RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

॥ ओ३म् ॥

अत्यन्तकोपः कटुका च वाणी
दरिद्रता च स्वजनेषु वैरम्।
नीचप्रसङ्गः कुलहीनसेवा
चिह्नानि देहे नरकस्थितानाम्॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

गम्यते यदि मृगेन्द्र-मन्दिरं
लभ्यते करिकपोलमौक्तिकम्।
जम्बुकाऽऽलयगते च प्राप्यते
वत्स-पुच्छ-खर-चर्म-खण्डनम्॥

( चाणक्य-नीति )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंकः-६ ( १७२ ) 卐 १६ सितम्बरः २०१८ तः ३० सितम्बरमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## श्लोकरचना-प्रशिक्षण-कार्यशालायाः आयोजनम्

नवदेहली। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे संस्कृतश्लोकरचना प्रशिक्षण कार्यशालायाः आयोजनमभवत्। एषु दिल्ली एन.सी.आर. एवं विभिन्न क्षेत्रेभ्यः 140 प्रतिभागी भागं गृहीतवन्तः। विद्यापीठस्य कुलपति प्रो. रमेशकुमारपाण्डेय उक्तवान यत् संस्कृत परम्परां अग्रसारणस्य आवश्यकता



अस्ति। एवं संस्कृत प्रशिक्षणार्थं मिलित्वा कार्य करणस्य आवश्यकताऽस्ति। मुख्य प्रशिक्षक रुपे समागत डॉ. महावीर प्रसादः प्रतिभागीन् श्लोक रचना विषये उक्तवान येन् प्रेरयित्वा एकस्मिन्नेव दिवसे 400 प्रतिभागी श्लोक रचना कृतवान। डॉ. सत्यपालः श्लोकरचनायां आगत् त्रुटि विषये उक्तवान। डॉ. रमाकान्त शुक्लः संस्कृत छन्दसां विषये उक्त्वा गायनस्य विधिं उक्तवान। प्रशिक्षण विषये विशेषज्ञ माध्ययेन अतिसुलभ विधिं प्रदत्तम्। डॉ. भागीरथीनन्द एवं डॉ. इच्छारामद्विवेदी तत्काल श्लोकनिर्माणस्य विषये उक्तवन्तौ एवं प्रत्येकदिवसे काव्यपाठाय उक्तवन्तौ। प्रो.

शेषभागःअष्टमपुटे

## हिन्दी विश्वस्य भाषाऽस्ति- दीपावाजवा

पश्चिमी दिल्ली। विश्वहिन्दी दिवसे रक्षासम्पदा महानिदेशालये हिन्दीपक्षस्य शुभारम्भ अभवत्। अस्मिन्नवसरे रक्षासम्पदायाः महानिदेशक दिपाबाजवा व प्रख्यात कवि पदमश्री डॉ. सुनीलजोगी मुख्यातिथि आस्ताम्। कार्यक्रमारम्यः हिन्दीदिवसे गृहमंत्री एवं रक्षामंत्री महोदस्य सन्देशेन सह



अभवत्। दीपावाजवा उक्तवती हिन्दीं केवलं दिवस एवं पक्ष पयर्न्तं न स्थापितव्यम् अपितु सम्पूर्ण देशे तस्याः प्रसारस्य आवश्यकताऽस्ति। सा उक्तवती यत् रक्षासम्पदा संगठनं सर्वदा राजयभाषां प्रति प्रतिबद्धोऽस्ति अनेनैव एकादश हिन्दी सम्मेलने मॉटिसस नगरे प्रतिभागी रूपेण चयनभगवत्। संसदीय राजभाषा समिति अपि अस्यै कृत हिन्दी भाषायाः कार्यस्य प्रशंसां कृतवान।

अस्मिन्नवसरे डॉ.सुनीलयोगी काव्यपाठं कृतवान एवं सम्पूर्ण सभागारस्य मनोरंजनं कृतवान। ते कविता माध्यमेन सामाजिक कुरितयः एवं रूढिवादी परम्परायां प्रहारं कृत्वा उक्तवन्तः यत् भारतम् संस्कृतिनां देशोऽस्ति। विश्वे प्रथमे भारतस्य स्थानं सर्वोपरि वर्तते। हिन्दी मातृवत् अस्ति अस्मान् व मातरं सम्मानं दातव्यम्। कार्यक्रमे निदेशालय एवं रक्षा मंत्रालयस्य सर्वे अधिकारी एवं कर्मचारी उपस्थिताः आसन्।

## नेपालीसंस्कृतिः भारतीय-संस्कृतेः अभिन्नम् अङ्गमस्ति

नवदेहली। हाम्रो स्वाभिमान संस्था माध्यमेन तालकटोरा सभाङ्गणे हरितालिका, तीज महोत्सवस्य आयोजनमभवत्। कार्यक्रमे मुख्यातिथि बाबा रामदेव एवं केन्द्रिय गृहराज्यमंत्री किरणरिजिजु उपस्थितौ आस्ताम्। कार्यक्रमस्यारम्भः दार्जिलिंगस्य कलाकार माध्यमेन मनमोहक नृत्य माध्यमेन



अभवत्। अत्र बहुसंख्यक नेपालि समाजस्य जनाः उभयं सम्मानं कृतवन्तः। रामदेव उक्तवन्तः यत् एवमेव कार्यक्रमं सम्पूर्ण देशे भवितव्यम्। नेपालि भाषां भारतीय संविधाने स्थानं अस्ति। नेपालि समाज भारतस्य अभिन्न अङ्गोऽस्ति। केन्द्रियमंत्री उक्तवन्तः यत् नेपालि संस्कृतिं विना भारतीय संस्कृति पूर्णों न भविंतु शक्यते। अतः नेपालस्य जनाः परिश्रमी एवं सद्प्रवृत्तेः भवति। ते सत्यस्य मार्गे गच्छन्ति। कार्यक्रमे विभिन्न राज्यतः समागतः कलाकारः स्व प्रस्तुतीं प्रदत्तम।

## स्वभाषां प्रति स्नेहं दर्शय, परन्तु अन्याः भाषाः प्रति द्वेषः न प्रदर्शनीयः -डॉ. सत्यपालसिंहः

नवदेहली। हिन्दी दिवस्योपलक्ष्ये कांस्टीट्युशन क्लब मध्ये विश्वहिन्दी परिषद एवं केन्द्रिय हिन्दी संस्थानस्य पक्षतः समारोह एवं कविसम्मेलनस्यायोजनमभवत्। कार्यक्रमस्य अध्यक्षता के. मा.सं.विकास राज्यमंत्री डॉ. सत्यपालसिंहः कृतवान्। सिंह उक्तवान यत् यदि अस्मान् कोऽपि वस्तु परम्परया प्राप्तो भवति तर्हि तं संरक्षणमावश्यकं भवति। एवमेव हिन्द्यामपि महत्वं अवश्यमं करणीयम्। सर्वाषां भाषणां जननि संस्कृतरस्ति एवं हिन्दी तस्याः पूत्री अस्ति। हिन्द्यां 50 प्रतिशतं संस्कृत शब्दाः सन्ति। वयं इंडियन न अपितु भारतीय स्मः। हिन्दी देशस्य संस्कृतेः संरक्षकोऽस्ति तस्याः संवर्धनमावश्यकम् परञ्य अन्याषां भाषाणामपि उपेक्षा सम्यकोनाऽस्ति।



केन्द्रिय राज्यमंत्री विजयगोयल उक्तवान यत् मोदी सर्वकारः हिन्द्यां कार्यं प्रतिबद्धोऽस्ति। अन्याषां अपेक्षा हिन्दी भाषि समाचार पत्रस्य पाठकः अधिकोऽस्ति।

हिन्दी हृदये निवसति। कार्यक्रमे कवयः स्व काव्यमाध्यमेन हिन्दी भाषायाः महत्वं प्रकटितवन्तः। कार्यक्रमे मुख्यातिथि डॉ. अरूण कुमारः, मुख्य वक्ता अतुलकोठारि, विशिष्टातिथि प्रो. किरणधई सिन्हा व आइटीबीपी उपमहानिदेशक आर.के.मिश्रा उपस्थितौ आस्ताम्।

# ‘हिन्दु’ शब्दस्य विषये भवति नकारात्मक विचारः

शिकागो। भारतस्य उपराष्ट्रपति वेंकैयानायडु विश्वहिन्दु सम्मेलने उक्तवान यत् केचन हिन्दु शब्द विषये नकारात्मक विचारः प्रदर्शयन्ति। सम्मेलनस्य अन्तिम सत्रे स्व सम्बोधने ते स्वामीविवेकानन्द सदृश महापुरुष माध्यमेन प्राप्त हिन्दुत्वस्य आदर्शस्य संरक्षण विषये बलं दत्तवान।




वर्ष 1896 मध्ये विवेकानन्द माध्यमेन कृत ऐतिहासिक भाषणस्य 125 वर्षेस्य अवसरे अत्र विश्वहिन्दु सम्मेलनस्य आयोजनमभवत्। त्रि दिवसीय सम्मेलने 60 देशतः 2500 प्रतिनिधि एवं 250 वक्ता सम्मिलितो अभवत्। आगामि विश्वहिन्दुसम्मेलनं 2022 तमे वर्षे बैकॉक मध्ये भविष्यति। नायडु उक्तवान यत् परस्परं अन्यस्थ विषये चिन्तनं अस्माकं धर्मदर्शनस्य मूलमस्ति।

हिदुत्व विषये प्रसारित भ्रान्ति विषये चिन्ता व्यक्तवन्त एवं उक्तवन्तः केचन जनाः अस्मिन् विषये भ्रान्ति प्रसारयित्वा हिन्दु शब्दं अस्पृश्य कृतवन्तः। प्रमाणिक ज्ञानमेव अस्य अन्धकारस्य निवृत्ति करणे समर्थोऽस्ति।

# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्,
गुणवत्ताप्रत्यायनपरिषदा ‘ए’ श्रेण्या प्रत्यायितम्)

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

**संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गतं 2018-19 वर्षे छात्रेभ्यः छात्रवृत्तिप्रदानाय**
**ऑनलाईन्-आवेदनार्थं सूचना**

संस्कृतभाषायाः प्रचारप्रसाराय मानवसंसाधानविकासमन्त्रालयस्य भारतसर्वकारस्य तत्त्वावधाने सञ्चालितं राष्ट्रियसंस्कृतसंस्थानं (मानितविश्वविद्यालयः), नवदेहली संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गतं छात्रेभ्यः मेधावीछात्रवृत्तिं ददाति। एतदुपलक्ष्य परम्परागतधारायां मान्यताप्राप्तेषु संस्कृतविद्यालयेषु/पाठशालासु/संस्कृतमहाविद्यालयेषु/संस्कृतविश्वविद्यालयेषु तथा आधुनिकधारायां मान्यताप्राप्तेषु माध्यमिकविद्यालयेषु/महाविद्यालयेषु/विश्वविद्यालयेषु च पूर्वमध्यमा(प्रथमवर्षम्)/नवमकक्षा, पूर्वमध्यमा(द्वितीयवर्षम्)/ दशमकक्षा, उत्तरमध्यमा/प्राक्शास्त्री(प्रथमवर्षम्)/एकादशकक्षा, उत्तरमध्यमा/प्राक्शास्त्री(द्वितीयवर्षम्)/द्वादशकक्षा, शास्त्री/बी.ए. (प्रथम/द्वितीय/तृतीय-वर्षम्), आचार्यः/एम.ए.(प्रथम/द्वितीय-वर्षम्) तथा विद्यावारिधिः/पी.एचडी. पाठ्यक्रमेषु अथवा तत्तत्समपाठ्यक्रमेषु वा संस्कृत/पालि/प्राकृत-भाषां मुख्यविषयरूपेण अथवा ऐच्छिकविषयरूपेण स्वीकृत्य नियमिताध्ययनरतानाम्/प्रवेशित-छात्राणां कृते छात्रवृत्तिप्रदानाय राष्ट्रियसंस्कृतसंस्थानस्य www.sanskrit.nic.in अथवा scholarship.rsks.in इति अन्तर्जालसङ्केतमाध्यमेन ऑनलाईन्-आवेदनपत्रम् आमन्त्रयते।

- छात्रवृत्तिप्रदानाय आवेदनपत्रं केवलम् ऑनलाईनद्वारा एव स्वीक्रियते। आवेदनपत्रम् अथवा प्रमाणपत्राणि पत्राचारमाध्यमेन अन्यमाध्यमेन वा संस्थानं प्रति प्रेषणस्य आवश्यकता नास्ति।
- ऑनलाईनद्वारा संस्थानां पञ्जीकरणार्थं तथा संस्थानां विवरणं परिष्कर्तुं तथैव च आनलाईनद्वारा छात्रैः आवेदनं कर्तुम् अपेक्षित-निर्धारिततिथयः -

| सोपानम् | विस्तृतसूचना | निर्धारिततिथयः | |
|---|---|---|---|
| 1. सोपानम् (Step-I) | सर्वा अपि शैक्षिकसंस्थाः www. sanskrit.nic.in अथवा scholarship.rsks.in इति अन्तर्जालसङ्केतमध्ये ऑनलाईन्-पञ्जीकरणम् तथा संस्थायाः विवरणं परिष्कुर्युः - | पञ्जीकरणार्थम् आरम्भतिथिः 09.09.2018 | पञ्जीकरणार्थम् अन्तिमतिथिः 31.10.2018 |
| 2 सोपानम् (Step-II) | सम्बद्धसंस्थानां नाम छात्राणां ऑनलाईन-आवेदनपत्रे प्रदर्शनात् परं छात्रः छात्रवृत्त्यर्थम् www. sanskrit.nic.in अथवा scholarship.rsks.in इति जालपुटे ऑनलाईन्-आवेदनं कर्तुं शक्नोति। | छात्रवृत्तेः आवेदनार्थम् आरम्भतिथिः 09.09.2018 | छात्रवृत्तेः आवेदनार्थम् अन्तिमतिथिः 09.11.2018 |

- छात्रवृत्त्यावेदनार्थम् अर्हता, नियमाः, आवश्यकप्रमाणपत्राणि इत्यादीनां विस्तृतविवरणार्थं संस्थानस्य www. sanskrit.nic.in अथवा scholarship.rsks.in इति अन्तर्जालसङ्केतम् अवलोकयन्तु।

*कुलसचिवः (प्रभारी)*

# विरक्तयष्टकम्

-डॉ.अरविन्दतिवारी

रक्तं कपोलकुसुमं परिचुम्बितं तत्
स्पृष्टं कुचाग्रमहहा नितरां प्रफुल्लम्।
आलिङ्गनं कृतमहो शतधा प्रकामं
ज्ञातं वयस्यपगते क्षणिकं समस्तम्।। 1

नेत्रैकवक्रनिशितेन शरेण विद्धः
कार्यं विहाय गतवान् मदनार्द्रचेताः।
पर्यङ्कविष्टरगतां विनतां कृशाङ्गी-
मालिङ्ग्य पीनजघनामभवं विरक्तः।। 2

केचिद्वदन्ति पलिते ननु केशजाले
कान्ताविरक्तिरिति तद्वचनं न मन्ये।
लब्धो मया प्रथम एव वयस्यतुल्य-
वैराग्यदीपकसृतः सुखदः प्रकाशः।। 3

आक्रीडितं मसृणकेशविमुक्तराशौ
रक्तौष्ठपानमचिरं तृषिनेन पीतम्।
पूतं शरीरमहहा मलिनं मदीयं
जातं कथं तव हरे करवाणि भक्तिम्।। 4

नावेक्षिता गुरुजनाः सदयाः प्रपूज्याः
नो भाषिता बुधजना मुहिरेण वन्द्याः।
सन्मित्ररम्यविपिनं न सुरक्षितं हा
कामाग्निदग्धमनुजेन मया मृतेन।। 5

नो सेवितं हरिपदं न कृता स्तुतिर्वा
देव्याः पदाम्बुजयुगस्य गते दिने वा।
द्वे विंशती स्ववयसो गृहिणा विनीते
स्वल्पं वयः शिरसि मृत्युकरोऽस्ति जाने।। 6

शुक्लं यशो दिशि दिशि प्रसरेन्मदीयं
सर्वे नमन्तु सुकविं मृदु भाषमाणाः।
गोष्ठ्यां गतेन मम कोविदसिद्धपीठं
संस्पन्दातामिति मतं भुवि भिन्नमेतत्।। 7

नो सम्मतं मुनिवचो न च शास्त्रमिष्टं
गङ्गाजले मुहुरये न कृतोऽभिषेकः।
नो बान्धवा न च जगत् समवेक्षितं तत्
लोके कलत्रकरपुत्तलिकेन बुद्धम्।। 8

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
सूती खादी व रेडीमेड ऊनी खादी व कम्बल ( रेडीमेड ) रेशम साड़ी ( रिल्ड ) रेशम स्पन व रेडीमेड पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद, अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

गतांकशेषभागः

# प्रसन्नभारतमिति महाकाव्ये ग्रामसंस्कृतिः

—डॉ नवलता
अध्यक्षा संस्कृतविभागः
विक्रमाजीतसिंह सनातनधर्ममहाविद्यालयः, कानपुरम्

**ग्रामकृशिः—**

ग्रामकृष्योरविनाभावो वर्तते खलु। ग्रामेषु कृषिर्द्विधा भवति। केचित्तु लघुस्तरीयाः कृषका भवन्ति ये स्वश्रमेण क्षेत्रेषु गोसंवलितां कृषिं कृत्वा परिवारस्य भरणपोषणार्थं संसाधनानि प्राप्नुवन्ति। अन्ये च सम्पन्नाः कृषका आधुनिकसंसाधनैर्व्यापकस्तरे नानाकृषी उत्पाद्य व्यवसायं कुर्वन्ति। उभयप्रकारका अपि कृषका नानासस्यान्युत्पादयन्ति। सस्यकाले क्षेत्रेषु नवसस्यानां पंक्तयः चक्षूंसि हरन्तीव। इक्षुपादपाः पवनोद्दोलनेन दोलन्ते यदा तदा कविः कल्पनां करोति यत्ते पेषणयन्त्रभयात्कम्पन्त इव।[11] एतन्मिषेण कविः एतदेव वक्तुमिच्छति यत्पेषणयन्त्रैः पेषणयोग्यः पर्याप्तमिक्षुकृषिः ग्रामेषूपलभ्यते। इक्षुसंवर्द्धनकाले पेषणयन्त्रैः इक्षून्निष्पीड्य गुडनिर्माणं क्रियते कृषकैः। प्रायेण गुडनिर्माणमनलसैः कृषकैः रात्रौ विशालेष्वयःकटाहेषु प्रताप्य ग्रामाद्बहिः क्रियते।[12]

क्वचिच्च नि पीडनयन्त्रनिर्गतः कृ षीवलैरिक्षुरसः प्रताप्यते।

कष्ष्यक्षेत्रेषु सेचनार्थं कृषकाः परस्परं साहाय्यं कुर्वन्ति। तीव्रातपेऽपि शिरसि धृतोत्तरीयाः कृषकाः स्वक्षेत्राणि हलेन कर्षन्ति। मध्याह्ने ग्रामवध्वः निजमूर्ध्नि शाकरोटिकां स्वीकृत्य गच्छन्ति स्वपतिमाशयन्ति च।[13] एवं पतिसेवाव्याजेन ता अपि कषिकार्ये सहायतां कुर्वन्ति।

पशुपक्षिभ्यः सस्यरक्षणार्थं गष्हस्य बालकाः मलिनदण्डान् हस्ते स्वीकष्त्य सस्यक्षेत्रेषु शुकादीन् पक्षिणोऽपसारयन्ति।[14] एवं तेऽपि कषिकार्ये सहायका भवन्ति। वस्तुतः कष्षकस्य सर्वोऽप्यभिनिवेशः कष्षावेव भवति। अत एव नरनारीबालवष्द्धा इति सर्वेऽपि स्वस्वशक्तिसामर्थ्यानुसारेण श्रमं कुर्वन्ति। सस्यानां लवनादिकार्यानन्तरं सस्यावशेषभूतो महत्पलालराशिः क्षेत्राद्बहिः खलेषु स्थाप्यते। तद्दष्ट्वा कविः कल्पनां करोति यत्पर्वतवत्साः ग्रामस्य नैसर्गिकसुषमां द्रष्टुकामा उपस्थिताः सन्ति।[15]

**ग्रामसंस्कृतिः—**

ग्रामवर्णने सर्वाधिकमहत्त्वमावहन्ती नगरेषु विलुप्तप्राया संस्कषतिरिदानीमपि ग्रामेषु द्रष्टुं शक्यते। तद्यथा ग्रामेष्वपि मनोरञ्जनार्थं नृत्यगीतवाद्यादि प्रचलति किन्तु तत्र नौटंकीति नाम्ना लोकनाट्यमतीव लोकप्रियं भवति। आदिनं क्षेत्रेषु कष्तपरिश्रमाः कष्षकाः रात्रौ नष्त्यगीतादिषु स्वयमपि भागार्हा भवन्ति, अथ स्त्रीवेशधराणां नौटंकीनाट्यं पश्यन्ति। तस्य चित्रणं कविः सजीवतया करोति—

**मष्त्दङ्गमञ्जीरधरैः सतालैर्न्युब्जीकष्ताङ्गैः पुरुशैर्नटद्भिः।**
**मध्ये कष्तः गायति मन्दहासं पादौ क्षिपन्नष्त्यरतो भ्रकुंसः।।[16]**

लोकनाट्यं ग्रामसंस्कष्तेर्महत्त्वपूर्णमङ्गमिति। अपरं तित्तरयुद्धं मेषयुद्धं च ग्रामक्रीडाया अङ्गम्।[17] प्रखरैर्नखैः परस्परं प्रहरन्तः तित्तराः परस्परं शीर्ष संघट्टयन्तः मेषाः मन्ये क्षात्रमनोरञ्जनस्य हेतुः। एतदर्थं रुचिमन्तः ग्रामीणा तित्तरान् मेषांश्च पालयन्ति। व्यायामः ग्रामक्रीडास्वन्यतमः। व्यायामशालासु मल्लेभ्यः विशेषप्रशिक्षणस्य व्यवस्था भवति। तत्र बानाबनेठीगदकादिव्यायामाङ्गानि शिक्ष्यन्ते प्रयुज्यन्ते च।[18] बालिकानां महिलानां च कष्ते मनोरञ्जनस्य साधनेषु ग्राममेलापकः प्रमुखम्।

यद्यपि ग्रामहट्टेषु दैनन्दिनावाश्यकतायाः सर्वाणि वस्तूनि प्रायः प्राप्यन्ते किन्तु वार्षिकमेलापके पण्येषु आभूषणभाण्डवस्त्रमिष्टान्नबालोचितक्रीडनकानि चेत्यादिवस्तूनि विक्रयार्थमानीयन्ते। तानि द्रष्टुं क्रेतुं चाश्वैः वष्षभयानैः पदातिर्वा सपरिवाराः लोका आयान्ति। तत्र मार्गेषु महान्सम्मर्दो जायते। ग्रामीणजनानां कृते ग्राममेलापकोयमाकर्षणस्य केन्द्रं भवति।[19] श्रावणमासे वष्क्षेषु दोलाः प्रलम्ब्यन्ते। तत्र गीतानि गायन्त्यस्तरुण्यः मनोविनोदं कुर्वन्ति।[20] ग्रामसंस्कृतेरपरः पक्षोऽतिथिसेवा खलु। गष्हमागतस्यातिथेः स्वागतमातिथेयः परम्परागतरीत्यैव करोति। तद्यथा द्वार्येव पाद्येन सत्कष्त्य सुखमुपवेश्य गष्ह उपलब्धेन भोज्यान्नेन तं तर्पयित्वा ततः कुशलमागमनप्रयोजनं च पष्च्छन्त्यातिथेयाः।[21]

**ग्राम्यपशवः—**

ग्रामेषु जनवसतिः प्रायः सस्यक्षेत्राणां समीपे भवति। अतः पशूनामपि तेषां साम्मुख्यं भवति। स्मरणीयमस्ति यद्वैदिकवाङ्मये ग्राम्यारण्यकपशूनां भेदो दर्शितः। तत्र ग्राम्यपशवः ग्रामजनस्य कृते अकारणं हानिकराः न भवन्ति। किन्तु ग्रामाणां समीपे तेषामुपस्थितिः तान् प्रति ग्रामीणानां सौमनस्यं कौटुम्बिकभावं चाभिव्यनक्ति। तद्यथा वाट्यां शशकाः क्षेत्रेषु गवयाः[22] वर्षतौ मयूराणां कैकारवः नर्तनमथ[23] च गोहस्तितुङ्गभष्ङ्गखरोष्ठगोमायुसरीसष्पादिसमस्तजीवेषु अपत्यभावः[24] पशुभि सह कुटुम्बवत्सम्बन्ध इत्यादि मानवपशुसम्बन्धस्य प्रमाणमिति। गौः ग्रामे माता मार्जारीमातृश्वसा काकश्च मातुलः कथ्यते।[25] किञ्च पशवोऽपि परस्परं निर्वैरतया निवसन्ति।[26]

**ग्रामीणानां दिनचर्याचरणं च—**

एवमतिथिवत्सलाः धर्मनिष्ठाः सरलाः गोसेवकाः पितष्श्राद्धे तर्पणे च कृतमतयः श्रुतिनिष्ठाः कुटुम्बभावोपेताः ग्रामजनाः भवन्ति।[27] अत्र तथैक्यभावो भवति यदेकस्य जामाता सर्वेषां जामाता पूज्यश्च भवति।[28] एतस्याः कुटुम्बभावनायाः प्रभावादेवाचौर्यं खलु ग्रामेषु दष्श्यते।[29] अथ बाह्याराजकतत्तवानां साम्मुख्यं मर्दनं च सर्वे सम्मेल्य कुर्वन्ति।

ग्रामेषु स्त्रीपुरुषाः बालवष्द्धाः सर्वेऽपि परिश्रमशीलाः भवन्ति। प्रातरेव पुरुषाः क्षेत्रेषु गत्वा कार्य कुर्वन्ति[30] महिलाश्च ग्रहेषु पेषण्याऽन्नपेषणे संलग्नाः भवन्ति। प्रतिगष्हं पेषिणीनां रवः श्रान्तिहरेण गीतस्वरेण सहैव श्रूयते।[31] युवावस्थायां स्थिताः मनोहराः ग्रामबालाः गष्हीतकुम्भाः जलानयनाय पष्थुपरिमाणात्मकं ग्रामकूपं गच्छन्ति।[32] प्रातः गोदोहानन्तरं चारणार्थं वीतेषु गताः गावः सायं प्रदोषकाले गलेषु लम्बितघण्टाध्वनिं कुर्वन्ती खुरोत्थधूलीपटलैः परीताः श्लथगात्रा आयान्ति।[33] द्वारि स्थिताः वष्द्धजनाः श्रमापनोदाय गुडगुडायमानध्वनिं हुक्कापानं कुर्वन्तः एकस्य हस्तादपरस्मिन्हस्ते अन्तरयन्ति यत्तदात्मीयसम्बन्धस्य कश्चिद्विलक्षणं प्रमाणमिति।[34] रात्रौ प्रायः पुरुषाः गष्हाद्बहिः खट्वायां स्वपन्ति। एवं ग्रामपुरुषाणां विलासवर्जनात्मिकाप्रवष्त्तिः द्योतते।[35] नगरैः सदष्शं ग्रामीणदम्पतयः एकशय्यायां शयनशीला न भवन्त्यपितु पष्थक्स्वपन्ति। तेषां दाम्पत्यमेलनं काठिन्येन कदाचिदेव भवति। एतस्मादेव संयमिनः शान्ताश्च भवन्ति ग्रामीणजनाः।

वस्तुतो एष चर्या परिवारनियोजनस्यापि कश्चित्सांस्कृतिकोपाय इति वक्तुं शक्यते। अथ च कादाचित्कदाम्पत्यमेलनत्वाद्दम्पत्योः पारस्परिकमाकर्षणं प्रेम च दृढीभवति। एतदतिरिच्य ग्रामेष्विदानीमपि स्वस्य वैदिकपरम्पराया अनुसरणं पितृतर्पणे प्रतिबद्धता तीर्थयात्राषु श्रद्धा देवताराधनं चेत्यादि संरक्ष्यते। तद्यथा—

**यत्रत्योऽतिथिपूजने प्रकुरुते श्रद्धां समिद्धां जनः।**
**स्वर्यातस्य च यो पितुर्निवपने दत्तादरस्तिश्ठति।।**
**तीर्थं गच्छति रक्षति श्रुतिपथं देवांश्च संसेवते।**
**धन्या ग्रामटिका हि यत्र निवसत्यद्याप्यहो**
**भारतम्।।[36]**

एवमद्यापि पर्यावरणप्रदूषणादपसंस्कृतेः प्रभावाच्चासंसक्ताः ग्रामा इति कवेरभिप्रायः। यद्यपि राष्ट्रस्य विकासयात्रायां नगराणीव ग्रामेष्वपि उद्योगानां प्रसारः शिक्षाव्यवस्थाया कृत्रिमचाकचक्यं पक्वेष्टिकागृहनिर्माणप्रवष्त्तिः संस्कारप्रदूषणं च दृश्यते यस्य प्रभावान्मद्यपानं चौर्यं लुण्ठनं बालाभिमर्षणादिकं च प्रायः श्रूयते तथापि सर्वथा न नष्टा पूर्वकल्पिताऽस्माकं ग्रामसंस्कृतिः। परिवारेषु सन्ततीनां परस्परं मतबिभेदवशाद्विभज्यमानानि गृहाणि सौमनस्याभावादीर्ष्याद्वेषादि कलहानि च वर्द्धमानाः दृश्यन्ते ग्रामेष्वपि तथापि काले सति कौटुम्बिकजनाः एकीभवन्ति। कृषिकार्येष्वपि कृषकाणां प्रवृत्तिः हीयमानाऽस्ति। वृषभपालनं नातिलाभकरमिति महार्घं चेति मत्वा कृषकैराधुनिकसंसाधनान्युपयुज्यन्ते। कृष्यक्षेत्राणामावासीयोपयोगार्थं विकासयोजनानां परिपूरणार्थं राजमार्गाणां विस्तारार्थं चाधिग्रहणं विधीयमानं वर्तत इदानीं सर्वकारैः। क्वचिदुद्योगेष्वधिकधनलाभो भविष्यतीति लोभात्कृषकाः कृष्यक्षेत्राणि विक्रयमाणाः सन्ति। एवं कष्ष्यभूमेरभावः सञ्जायते।

महाकविनाऽचार्यगिरिजाशंकरमिश्रेण या ग्रामसंस्कृतिः प्रसन्नभारतमिति महाकाव्ये चित्रिता सा वस्तुतः भारतस्यादर्शभूता संस्कषतिः। सारतया तस्यैव शब्देषु—

**अध्वन्यध्वनि तरवो सदने सदने सुगन्धिरर्चोत्थः।**
**द्वारे द्वारे खट्वासीनातिथिवर्गवरिवस्या।।[37]**

इति शम्

**सन्दर्भः**

11 क्षेत्रे निषण्णाः प्रचलत्समीरैर्यत्रेक्षुदण्डा बहुकम्पमानाः। मन्ये च ते पेषणयन्त्रभाविनिष्पीडनाद् भीतिमिवोद्गिरन्ति।। तदेव— 12/16

12. क्वचिच्च निष्पीडनयन्त्रनिर्गतः कष्षीवलैरिक्षुरसः प्रताप्यते। अयःकटाहेषु विरच्यते गुडो गतालसैर्दीघतरासु रात्रिषु।। तदेव— 12/42

13 चण्डातपे क्षेत्रमुपेत्ययत्र ग्रामीणवध्वो निजमूर्ध्निसंस्थम्। संजीवयन्त्यः पतिमाशयन्ति शाकेन सार्द्धंष्थुरोटिकान्नम्।।तदेव— 12/7

14 तदेव— 12/36

15 ग्रामाद्बहिर्भान्ति समस्थलेषु पलालपुंजाः भष्शतुंगरूपाः।
संवीक्षितुं ग्रामनिसर्गशोभां धरामुपेता इव शैलवत्साः।।
तदेव— 12/17

16 तदेव— 12/8

17 चञ्चुप्रहारैः प्रखरैर्नखैश्च युद्धं क्वचित्पालिततित्तराणा्।
क्वचिच्च मेषावपसष्त्यभूयो वेगेन संघट्टयतः स्वशीर्षे।।
तदेव 12/11

18 बलिष्ठमल्लप्रसवप्रवीणा व्यायामशालापि विभाति यत्र।
बाना बनेठी गदकादिसर्वं प्रशिक्ष्यते शौर्यसमृद्धिकामैः।।
तदेव—12/20

19 प्रत्यब्दमत्रैव हि बोभवीति मेलापको मोदकरो जनानाम्।
यस्यागतानामवलोकनाय भवन्ति नॄणां जनशून्यगेहाः।।
पण्यस्थिताभूषणभाण्डवस्त्रमिष्टान्नबालोचितखेलनानि।
रुच्या समालोकयतां मनांसि तानीह केषां न हठाद्धरन्ति।।
तदेव— 12/22,23

20 रसालये श्रावणमासकाले वष्क्षेषु वष्क्षेषु लसन्ति दोलाः।
यासु स्थिता गीतमुखास्तरुण्यद्धचेतांसि यूनामपि दोलयन्ति।।
तदेव 12/24

21 यत्रातिथिं द्वारमुपेतमेव पाद्येन सत्कष्त्य सुखं निवेश्य।
तमाशयित्वा गष्हलब्धभोज्यं पष्च्छन्ति पश्चात्कुत आगतोऽसि।।
तदेव— 12/28

22 तदेव— 12/9

23 तदेव 12/19

24 तदेव 12/31

25 मातष्स्वषा तु मार्जारी गौर्माता ग्रामवासिनाम्।
काकोऽपि मातुलश्चात्र क्वेदष्क्सम्बन्धसम्भवः।।
तदेव 12/51

26 विभिन्नजातेः पशवोऽतिहष्टाश्चरन्ति निर्वैरतयोपशल्ये।
यथार्यभूभारतवर्षदेशे विभिन्नधर्माश्रयिणो मनुष्याः।।
तदेव 12/26

27 आर्योचिताचारविचारकार्यपरम्पराऽनोकहवीजभूतम्।
निसर्गसौन्दर्यनिकेतनं तं ग्रामस्य वन्देऽणुमणुं प्रणम्यम्।।
तदेव— 12/32

28 तदेव 12/50

29 तदेव 12/30

30 तदेव 12/5,6

31 प्रतिप्रभातं प्रतिगेहमुत्थितः कुटुम्बिनीकष्टसुपेषिणीरवः।
मनोज्ञगीतिध्वनिरागबर्षहितः श्रुतौ जनानां वमतीव माक्षिकम्।।
तदेव 12/33

32 तदेव 12/36

33 तदेव— 12/25

34 तदेव 12/27

35 ग्रामस्यास्तिविलासवर्जनकरं वैशिष्ट्यमेकं हि तत्।
रात्रौ द्वारि भुवि स्वपन्ति पुरुषाः नो ते गष्हाभ्यन्तरे।।
ग्रामे नागरिका इवात्र पुरुषा नैवैकशय्याशयाः।
कष्च्छात्तत्र समाप्नुतोऽधिभवनं सम्मेलनं दम्पती।।
तदेव 12/49

36 तदेव— 12/45

37 तदेव 12/52

पाठकानां कृते सूचनाः-
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249

# सम्पादकीयम्

सुरभारतीसमुपासकेभ्यो नमो नमः!

महान् प्रमोदो हृदि समुद्भवति यदा श्रूयते यत् संस्कृते नवीनं काव्यं रचितम्। मान्याः! निगदन्ति अनभिज्ञाः सभासु यत्संस्कृते रचनौदासीन्यमधुना विलोक्यते। ते कूपमण्डूका इव स्वविषयमेव प्रसृतं मन्यमानाः संस्कृतं निन्दन्तो जल्पन्तो वराका इव समवलोक्यन्ते। एतेषाम् अनर्गलं प्रलापं निशम्य मनो हसतीव। सज्जनाः! यावन्ति महाकाव्यानि संस्कृते आधुनिकसमये रचितानि सन्ति न तावन्ति हिन्दीभाषायां विलोक्यन्ते। इयं वार्ता एकस्यां सभायां प्रो अभिराजराजेन्द्रमिश्रवरैः विज्ञापिता। तैः सत्यमुक्तं यत् संस्कृतं परिवर्धमानमस्ति। सर्वत्र रचनाः क्रियमाणाः विलसन्ति। नवनवकवयः इव स्वप्रतिभया काव्यजगत् प्रकाशयन्ति साम्प्रतमिति प्रमोदकरं वृत्तम्।

सुविज्ञाः! नवनवपत्रपत्रिकाणां प्रकाशनं सोशलमिडियासु संस्कृतकार्यक्रमायोजनानि च संस्कृतस्य विश्वव्यापकत्वं साधयन्ति। समसामयिकविषयेषु सद्योरचनां कुर्वन्त आशुकवयो न कं विमोहयन्ति। जानाति सर्वोऽपि लोकः। अस्तु। वक्तारो वदन्ति अनभिज्ञाः। अस्माभिः संस्कृतज्ञैर्न भेतव्यम्। संस्कृतयुगं स्वर्णिमं कर्तुं सर्वेषामपि सहयोगोऽपेक्षितो वर्तते। सर्वे संस्कृतपत्रपत्रिकाणां प्रकाशने क्रयणे विक्रयणे मुक्तहस्ता भवन्तु। अन्यानपि प्रेरयन्तु। डॉ अरविन्दकुमारतिवारीद्वारा प्रकाश्यमानपत्रिका काव्यामृतवर्षिणी छन्दोविशेषांका संस्कृतजगति ख्यातिं लभते। देशस्य सर्वेष्वपि भागेषु सा गच्छन्ती कवीनां मनांसि चोरयन्ती वर्तते।

साहित्य-अकादमीद्वारापि युवकवीनां प्रोत्साहनं दर्शनीयमस्ति। उत्तरप्रदेशसंस्कृतसंस्थानस्य यशस्विनोऽध्यक्षाः डॉ वाचस्पतिमिश्रमहोदयाः संस्कृतोत्थानाय युवकवीनाकरयन्ति। येषां मन्तव्यमस्ति युवकानां भागग्रहणमावश्यकमस्ति। एत एव संस्कृतस्य भाविनो रक्षकाः। इयं भावना यदि सर्वेषामपि भवेत्तदा संस्कृतयुवकवयः समुत्साहिता भवन्तो रचनायां संलग्ना भविष्यन्ति। अस्तु संस्कृतप्रचारदिशि दिल्ली संस्कृत अकादमी अपि प्रतिपलं कार्यक्रमम् आयोजयति। येन संस्कृतवाङ्मयस्य रक्षणं क्रियमाणमस्ति। सर्वेऽपि भवन्तो भवत्यो वा भूरिशो वन्दनीया मम, ये अमरवाणीसंरक्षणाय बद्धपरिकराः विलोक्यन्ते। अन्ते सुरभारती विजयतामिति कामयमाना स्वीयां वाणीमवसाययामि।

# वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**अग्ने सुखतमे रथे देवाँ ईळित आ वह।**
**असि होता मनुर्हितः॥४॥**

अर्थ-मनुष्यों को बहुत कलाओं से संयुक्त पृथिवी, जल और अन्तरिक्ष में गमन का हेतु तथा अग्नि वा जल आदि पदार्थों से संयुक्त तीन प्रकार का रथ कल्याणकारक तथा अत्यन्त सुख देनेवाली होकर बहुत उत्तम-उत्तम कार्यों की सिद्धि को प्राप्त करानेवाला होता है॥४॥

फिर वह भौतिक अग्नि उक्त प्रकार से क्रिया में युक्त किया हुआ क्या करता है, सो अगले मन्त्र में उपदेश किया है–

**स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः।**
**यत्रामृतस्य चक्षणम्॥५॥**

अर्थ-विद्वान् लोग अग्नि में जो घृत पदार्थ छोड़ते हैं, वे अन्तरिक्ष को प्राप्त होकर वहाँ के ठहरे हुए जल को शुद्ध करते हैं और वह शुद्ध हुआ जल सुगन्धि आदि गुणों से सब पदार्थों को आच्छादन करके सब प्राणियों को सुखयुक्त करता है॥५॥

अब अगले मन्त्र में घर, यज्ञशाला और विमान आदि रथ अनेक द्वारों के सहित बनाने चाहिएँ इस विषय का उपदेश किया है-

**वि श्रेयन्तामृतावृधो द्वारा देवीरसश्चतः।**
**अद्या नूनं च यष्टवे॥६॥**

अर्थ-मनुष्यों को अनेक प्रकार के द्वारों के घर, यज्ञशाला और विमान आदि यानों को बनाकर उनमें स्थिति होम और देशान्तरों में जाना-आना करना चाहिए॥६॥

यह चौबीसवाँ वर्ग समाप्त हुआ॥

उक्त कर्म से दिन-रात सुख होता है, सो अगले मन्त्र में प्रकाशित किया है–

# पुराणेषुनारीणांराजनीतौस्थानम्

संदीपकुमारउपाध्याय

वैदिककालतःपुराणकालंयावत्भारतीयवाङ्मयेस्वल्पमात्रमेवैतादृशंविवरणंप्राप्यतेयस्मिन्रा-ज्ञयोराजकुमार्यश्चशासन-भारंराजसिंहासनंवाअलङ्कुर्वन्। पुराणकालानन्तरं बौद्धजातक-कथासुराज-महिषीणांशासनस्योल्लेखःअवश्यमेवप्राप्यते। पुराणसमयेऽपिनार्योयुद्धेभागंगृह्णन्तिस्म।अस्यचविस्तृतविवरणंपुराणेषु-समुपलभ्यते। स्कन्दपुराणेमुरदैत्यपुत्रीकानकटङ्कटाकृष्णेन-सहयोधितवती–

**ततोहतेमुरौदैत्येमयातस्यसुताव्रजत्।**
**योद्धंमामतिवीर्यत्वाद्घोराकामकटङ्कटा॥**
**तांततोहंमहायुद्धेखड्गखेटकधारिणीम्।**
**अयोधयंमहाबाणःसुशारङ्गधनुयश्युतः॥**

मार्कन्डेयपुराणेदेवीभागवतपुराणादिषु चदेवीनांचण्डमुण्ड-महिषासुरादिदैत्यैःसहयुद्धस्यविस्तृतंवर्णनंप्राप्यते। कल्किपुराणस्यतृतीयांशेस्त्रीभिःसहकल्केर्युद्धस्यचित्रणमतीवरोचक-प्रकारेणवर्णितमस्ति–

**तेषांस्त्रियोरथारूढागजारूढाविहगवान।**
**समारूढाहयारूढाखरोष्ट्रवृषवाहनाः॥**
**योद्धंसमायुजस्त्यक्त्वापत्यपत्यसुखाश्रयात्।**
**रूपवत्योयुवत्योऽतिबलवत्यःपतिव्रताः॥**

मार्कण्डेयपुराणेषुमनोरमअनामिकायाःकन्यायाःसमीपेसर्वासांस्त्रीणांहृदय-विद्यासत्वस्योल्लेखोप्राप्यतेमयाऽपिशिक्षितंवीर! सकाशाद्बालयापितुः।

हृदयंसकलशान्नमशेषरिपुनाशम्॥ मार्कण्डेयपुराणेमदालसायाः-वर्णनंप्राप्यतेसासविस्तरंस्वपुरान्राजधर्ममुपदिशतिस्म वत्स! राज्येऽभिषिक्तेनप्रजारञ्जनमादितःकर्श्रव्यविरोधेनस्वधर्मस्यमहीभुता-

**व्यसनानिपरित्यज्यसप्तमूलहराणिवै।**
**आत्मारिपुभ्यःसंरक्ष्योबर्हिमन्त्रविनिर्गमात्॥**

एतदधिकस्यराजधर्मस्योपदेशोनकेनापिराजधर्मज्ञानंविनाकर्तुं-शक्यते अतःनिःसन्देहकथयितंशक्यतेयत्मदालस-ासदृशीराजमाताराजनीतौविशारदासीत्।
स्कन्दपुराणेवर्णनंप्राप्यतेयत्कुमारीनायिकाएकाराजकन्यायैतस्याः-पितास्वपुत्रसमानंराज्यभागंप्रदानमकरोत्

**अनिच्छन्त्यांकुमार्यांचवरंद्रव्यंचपार्थिवः।**
**तथान्यदपिप्रीत्यासौयद्ददौनृपतिःशृणु॥**
**इदंभारतखण्डंचनवधैवविभज्यसः।**
**ददावष्टौस्वपुत्राणांकुमार्यैनवमंतथा॥**

अनिच्छन्त्यापिकुमार्याराजास्वपुत्रींराज्यकरणयोग्यामत्वाराज्यस्यैकभागं-पुत्रीकृतेदश्रवान्। भ्रातरोपिस्वराज्यविभाजनायकुमारी-सकाशादानुरोधंकृतवन्तः-

**खण्डोत्र्वेनद्रव्येणतपेदानानियच्छती।**
**ततःकेनापिबालेनभातृभ्योष्टाभ्यएवच॥**

एतत्वार्ताअवश्यमेवसिद्ध्यतियत्शासनयोग्यताकुमरीषुसमभवत्तथाचताः-राजनिज्ञाः-आसन्। एतेषांसर्वेषांपूर्वदृष्टप्रमाणानांविश्लेषणेन-निःसन्देहमेतत्वक्तुंशक्यतेयत्पुराण-कालेऽपिनारी-णांराजनैतिक-कार्येषुभागा-दानस्यशासनकरणस्ययुद्धादिषुयथा-समयेभागग्रहणस्यपुत्राणांपत्येःराज्यकर्मणिमन्त्रणादानस्यचपूर्णस्वातन्त्र्यमासीत्।

पऽपुराणेऽपितारासद्वारारामेणसहकथोपकथनप्रसंगोऽपिराजनीतैः-उदाहरणंश्रेष्ठतरंप्राप्नोतिकिष्किन्धायांबालि-नामकेतारापतौहतेसतितारारामंप्रतिकथयतियत्हेराम!
भवन्तंराजधर्मस्यज्ञानंनवर्तते–

**नक्षत्रधर्मंनजानीषेराजगणसेवितं।**
**अन्योन्यंयुद्धयतोर्युद्धेजयोयामरणंभवेत्।**
**अन्योयदितयोर्हन्यात्ब्रह्ममहासनिगद्यते॥**

अनेन्पऽपुराणस्यप्रमाणेनज्ञायतेयत्ताराराजनीतिज्ञाआसीत्। पुराणकालेराजनीतेः-शिक्षायाःप्रचलनंसम्भाव्यते।

यद्यपिप्रस्फुटंविशदंचविवरणंपुराणसमयेनोपलभ्यतेतथापिएतादृश्यो-वीराङ्गनाःसन्तियाश्चस्वपुत्राणां-पतीनाञ्चकृतेराज-धर्मस्यशिक्षायैप्रदायसमयेसमयेचतान्प्रबोधयन्प्रोत्साहितवत्यःच। मार्कण्डेयपुराणेकरन्धमस्यपत्न्यावीरायाःप्रसङ्गोप्राप्यते। तथाहियदावीरायाःपुत्रःअवीक्षितविशालनगरस्यस्वयंवरेराजभि-:परावृत्यवन्दीकृतस्तदावीरा-स्वपतिकृतेराजधर्मस्यक्षात्रधर्मस्यच-परिचयंप्रदायपुत्रकृतंकार्यंप्रशंसयचशत्रून्प्रतियुद्धाय-स्वपतिंकरन्धमंप्रेषयामास।

अनेन्आख्यानेन्ज्ञायतेयत्वीराऽपिराजनीतिज्ञाशिक्षाशास्त्रप्रवीणाचासीत्। स्कन्दपुराणेऽपिएकोपोख्यानम्प्राप्नोति-काशिराज्ञःपुत्रीकलावतीस्वपतिंदाशार्हंप्रतिकथयतियन्मह्यं-महर्षिदुर्वासाबाल्यकालादेवपञ्चाक्षरंमन्त्रंप्रादात्-

**राजन्! ममपुराकल्पेदुर्वासामुनिपुङ्गवः।**
**शैवींपञ्चाक्षरींविद्यांकारुण्येनोपदिष्टवान्॥**

अनेनिश्चेतुंशक्यतेयत्अन्यकालापेक्षयापुराणकालेनार्यो-राजनीतौभागंनयन्तिस्मतथाराज्यशासन-सम्बन्धिप्रत्येक-प्रतीकोपरितासांविशेषज्ञानमासीत्। राजनीतिसम्बन्धेतासांकृते-समुचितशिक्षाऽपिप्राप्तासीत्।


## अन्तर्राष्ट्रीय आर्य महासम्मेलन दिल्ली : 25-26-27-28 अक्टूबर, 2018

**महासम्मेलन के चारों दिन (25-28 अक्तूबर) तक आयोजित होने वाले विषय अनुसार महत्त्वपूर्ण सम्मेलनों का विवरण**

२५ अक्टूबर, २०१८: उद्घाटन सम्मेलन, वेद सम्मेलन, अंधविश्वास निवारण सम्मेलन, आर्यवीर सम्मेलन, भजन एवं गीत संध्या

२६ अक्टूबर, २०१८: निरन्तर क्रियाशील आर्यसमाज, संस्कृति एवं सामाजिक संचेतना सम्मेलन, आर्य महिला सम्मेलन, लेजर शो, भजन प्रस्तुति, मानव कल्याण एवं विश्व शान्ति एकता यज्ञ (एकरुपीय यज्ञ-प्रशिक्षित याज्ञिकों द्वारा - मुख्य पंडाल में सीधा प्रसारण), महर्षि दयानन्द का व्यक्तित्व एवं कृतित्व सम्मेलन, कवि सम्मेलन

२७ अक्टूबर, २०१८: राष्ट्र चिन्तन सम्मेलन, विश्व आर्यसमाज सम्मेलन, आर्य परिवार सम्मेलन, व्यायाम प्रदर्शन, आर्यसमाज सेवा कार्य सम्मेलन, भजन संध्या

२८ अक्टूबर, २०१८: संकल्प सत्र, आर्य सांगठनिक सम्मेलन, समापन सत्र

**महासम्मेलन में विचारणीय कुछ मुख्य विषय**

- संस्कारित परिवार - समाज निर्माण
- जनसंख्या का सांस्कृतिक/वैचारिक असंतुलन-एक नए खतरे का संकेत
- मानव निर्माण का आधार
- मानव की आवश्यकता - आध्यात्म एवम् योग
- विश्व स्तर पर असंतुलित लिंग अनुपात
- बदलते सामाजिक एवं नैतिक मूल्य-समाधान क्या? कैसे?
- निरन्तर बढ़ता प्रदूषण - मानव जाति के लिए चुनौती- यज्ञ एवं सौर ऊर्जा सर्वोत्तम समाधान
- शिक्षा - केवल रोजगार या मानव उन्नति का साधन?
- बढ़ती नशा प्रवृत्ति - जिम्मदारी कानून की या समाज की?
- अंधविश्वासों का बढ़ता विश्वव्यापी व्यापार - निराकरण हेतु हमारी भूमिका : जनचेतना व धार्मिक भ्रष्टाचार निरोधक कानून ही उपाय
- गोरक्षा, आयुर्वेद, धर्मान्तरण, तुष्टीकरण
- बढ़ती जाति की दीवारें - समाज संस्कृति व राष्ट्र के लिए घातक
- वर्ण व्यवस्था -वास्तविक मनुवाद
- आर्यसमाज - नए युग में प्रवेश - दृष्टि २०२४-२०२५
- सोशल नेटवर्किंग - समाज में बदलाव-सुधार या बिखराव
- मानव सम्बन्ध - न्यायालयीय आदेश/निर्देश - स्वीकार्यता
- परिवारिक परिस्थिति - रिश्तों को बचाईए
- आर्य (हिन्दू) जाति में ऊंच-नीच का विभाजन
- देश में दलित व मुस्लिम गठजोड़ - एक अन्तर्राष्ट्रीय साजिश
- एकाकी संतान - बच्चे तथा परिवार के विकास के लिए घातक
- दूषित अन्न - स्वास्थ्य का शत्रु - जीरो बजट खेती-एक समाधान
- एक मंदिर एक शमशान-तभी होगा भारत महान
- आर्यसमाज की भावी कार्य पद्धति व योजना
- संकल्प सत्र एवं आओ करें, कल की बातें

# वेदेषु यज्ञतत्त्वविमर्शः

**डॉ. रामकिशोर मिश्रः**
वेदविभागाध्यक्षः प्राध्यापकश्च
शा. दू. श्री वै. स्नातकोत्तर संस्कृत महाविद्यालयः
रायपुरम् (छ.ग.)

**तस्माद्यज्ञात – सर्वहुतऽऋचः सामानि जज्ञिरे ।**
**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। (शु.य.31/7)**

इयमृचा चतुर्षु वेदेषु प्राप्यते । अस्यामृचायां वर्णितं यत् यज्ञपुरूषाद् भगवत एव समस्तवेदानामुद्भवः संञ्जातः । यज्ञपुरूषादुत्पत्स्यमानेषु वेदेषु यत्किमपि कथितं, विवृतं वा तत्सर्वं यज्ञपरकं विद्यते ।

वेदाः चत्वारः सन्ति । तत्र चतुर्णां वेदनां 1131 शाखाः सन्ति । तासु शाखासु कर्मकाण्डम्, उपासनाकाण्डम्, ज्ञानकाण्ड च एते त्रयो विभागाः प्राप्यन्ते । एषां समस्त विभागैकमेकलक्षपरिमितं संख्या वर्तते ।

**चरणव्यूहे कथितं यत् –**
**''लक्षं तु वेदाश्चत्वारो लक्षं भारतमेव च'' (चरणव्यूहः 5/1) वैदिकमन्त्रेषु लक्षैकपरिमितेष्वेतेषु कर्मकाण्डस्य 80 सहस्त्रमन्त्राः** । उपासना काण्डस्य 16 सहस्त्रमन्त्रा वर्तन्ते । अत्र सर्वाधिकमन्त्राः कर्मकाण्डे एव विहिताः । अतः स्पष्टं यत् वेदेषु कर्मकाण्डस्य यावन्तो मन्त्रास्सन्ति तावन्तोऽन्यस्य विषयविशेषस्य न सन्ति।अनया धिया यदि कथ्यते यत् वैदिकासु ऋचासु कर्मकाण्डस्य हि प्राधान्यं तथा कर्मकाण्डभागः एव वेदानां मुख्यः प्रतिपाद्यविषयश्चेत् नात्युक्तिः । यदि वेदेभ्यः कर्मकाण्डविषयः पृथक्क्रियेत चेत् तर्हि वेदानां सार्थकतैव समाप्ता भविष्यति । अतः कर्मकाण्डभागे विशेषतया यज्ञानां प्राधान्यं वरीवर्ति । निष्कर्षेण वक्तुं शक्यते यत् वेदानां मुख्यविषयः यज्ञ एव । यज्ञैरेव वेदानां सम्प्रतिष्ठा । यज्ञाः वैदिकसंस्कृतेः प्रधानाङ्गानि वर्तन्ते । यज्ञैरेव समस्तस्य जगतः कल्याणं भवति । यज्ञेषु लोककल्याणस्य भावना विशेषरूपेण परिनिष्ठता भवति । ऐतरेयब्राह्मणानुसारेण –

**''यज्ञोऽपि तस्यै जनतायै कल्पते'' ।(ऐत. 1/2/3)**

अर्थात् यज्ञः जनकल्याणाय विधीयते । यज्ञेषु लोककल्याणस्य भावना मुख्याऽस्ति । अतः लोकल्याण दृष्ट्या सर्वेषु युगेषु यज्ञानां नितरामावश्यकता विद्यते ।

''यज्ञ इति शब्दः देवपूजासङ्गतिकरणदानेषु धातोः'' यजयाचयतविच्छप्रच्छरक्षेनङ्'' अनेनसूत्रेण नङ प्रत्यये कृते सति सन्धिकार्ये प्रातिपदिकत्वे सति ''यज्ञ'' इति शब्दः निर्मितः भवति । अर्थाद् इन्द्रादिदेवानां पूजनं सत्कारभावनं यज्ञः । अपि च ''इज्यन्ते सम्पूजिताः तृप्तिमासाद्यन्ते देवा अनेनेति यज्ञः'' अन्यच्च यजनं धर्मदेशजातिमर्यादारक्षायै महापुरूषाणामेकीभवनं यज्ञः ।।

''इज्यन्ते चत्वारो वेदाः साङ्गाः सरहस्याः सच्छिष्येभ्यः सम्प्रदीयन्ते (उपदिश्यन्ते) सदाचायै र्येन वास यज्ञः ।। यस्मिन् कर्मणि चतुर्वेदाः साङ्गोपाङ्गः उत्तमशिष्येभ्यः योग्यैः आचार्यैः उपदिष्टाः भवन्ति सः यज्ञः ।

यज्ञः कस्माद् ? प्रख्यातं यजति कर्मेति नैरूक्ताः ।
किमर्थ यज्ञः ? यज् धातोरर्थः लोके वेदे प्रसिद्धो वर्तते।
इत्थं निरूक्तविद्वांसो मन्यते।

''दैवतं प्रति स्वः द्रव्योत्सर्जनं यज्ञः'' देवानां कृते निजस्य धनस्य त्यागः, समर्पणञ्च यज्ञः इति कथ्यते।

**देवानां द्रव्यहविषां ऋक्सामयजुषां तथा ।**
**ऋत्विजां दक्षिणाना च संयोगो यज्ञ उच्यते।।**
**(मत्स्यपुराण 1467/144)**

यस्मिन् कर्मविशेषे देवता – हवनीय द्रव्य–वेदमन्त्र–ऋत्विक् दक्षिणानामेतेषांप चानां संयोगो भवति तद्यज्ञः ।

यज्ञभेदाः – प्रधानतया यज्ञस्य प्रकारद्वयं वर्तते। श्रौतयज्ञः, स्मार्तयज्ञः। श्रुतिप्रतिपादितयज्ञः श्रौतयज्ञः कथ्यते, एवं स्मृतिप्रतिपादितयज्ञः स्मार्तयज्ञः कथ्यते । श्रौतयज्ञे केवलं श्रुतिविहितमन्त्राणां प्रयोगो विधीयते तथा स्मार्तयज्ञे वैदिकपौराणिकतान्त्रिकमन्त्राणां समावेशो भवति । वेदेषु अनेकयज्ञानां वर्णनं प्राप्यते । किन्तु तेषु निम्नलिखताः प चविधाः यज्ञाः प्रधानाः मताः ।

''स एषः यज्ञः प चविधः अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः इति (ऐतरेय्ब्राह्मणः) 1. अग्निहोत्रयागः, 2. दर्शपूर्णमासयागः 3. चातुर्मास्ययागः 4.पशुयागः 5.सोमयागः इति। एतेषु पञ्चप्रकारकेषु यज्ञेषु श्रुतिप्रतिपादितवैदिकयज्ञाः पूर्णा भवन्ति । गौतमधर्मसूत्रे (8/18) निम्नलिखितानां यज्ञानामुल्लेखो विद्यते–औपासनहोमः, वैभूवदैवम्, पार्वणम् अष्टका, मासिकश्राद्धम्, श्रवणा, शलगवः, इति सप्तपाकयज्ञसंस्थाः ।

अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रमणिः, पिण्डपितृयज्ञादयो दर्विहोमा इति सप्तहविर्यज्ञसंस्थाः । अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः आप्तोर्याम इति सप्त सोमसंस्थाः ।

गौतमधर्मसूत्रकारेण पाकयज्ञः, हविर्यज्ञः, सोमयज्ञः इति त्रिविधं यज्ञभेदं प्रदर्श्य प्रत्येकस्य यज्ञस्य सप्तधा भेदं संदर्श्य 21 प्रकारकाणां यज्ञानां उल्लेखः कृतः । एतेषु सप्त स्मार्तपाकयज्ञसंस्थानामुल्लेखो गृह्यसूत्रे तथा च धर्मसूत्रे प्राप्यते। अग्निहोत्रादारभ्य सोमसंस्थान्त 14 यज्ञानामुल्लेखः कात्यायनादिश्रौत्रसूत्रेषु लभ्यते।

गृहस्थस्य पञ्चमहायज्ञाः – नित्यकर्म, नैमित्तिकर्म, काम्यकर्म इति कर्मणः त्रिविधः प्रकारो भवति ।पञ्च

येन कर्मणा कस्यचिदपि फलस्य प्राप्तिर्न भवेत् तथा न कृते सति पापभाग् भवेत्तानि नित्यकर्माणि कथितानि। यथा त्रिकालसन्ध्या, प चमहायज्ञादयः।

प चमहायज्ञैः आत्मोन्नत्यादेः अवान्तरफलप्राप्तौ सत्यपि ''पञ्चसूना'' इति दोषमुक्तये शास्त्रकाराणामाज्ञा यत् सवैर्गृहस्थैः पञ्चमहायज्ञा अहरहः कर्तव्याः।। अर्थात् गृहस्थस्य कृते पञ्चमहायज्ञाः अनिवार्याः। एतेन स्पष्टं यत् एभिर्यज्ञैः पुण्यस्यावाप्तिर्नास्ति किन्तु अकृते सति पापाचरणं गण्येत।

मानवजीवनयात्रायां सहजतयानेकेषां जीवजन्तूनां नित्यं हिंसा भवत्येव–यथा गमनागमने, भोजनस्य ग्रासे, श्वासप्रश्वासयोर्ग्रहणे हिंसा भवति प्रायः । प्राणधारी मनुष्यः एतेभ्यः पापेभ्यः कदापि रक्षितो वा मुक्तो भवितुं नार्हति । अतः एतत्पापमुक्तये एव महर्षिभिः पञ्चमहायज्ञानां विधानं कृतम्।

भगवान् मनुः वदति –

**यत् – पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः।**
**कण्डनी चोदकुम्भस्य बाध्यते यास्तु बाधयन्।।**
**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।**
**पञ्चक्लृप्ताः महायज्ञाः प्रत्यहं गृहमेधिनाम्।।**

प्रत्येकस्य गृहस्थस्य गृहे चुल्लीज्वालने, सम्मार्जने, उलूखलप्रयोगे, जलपाने, पिष्टकनिर्माणेएतेषु प चकर्मसु हिंसास्थानां विद्यते एव । एतेभ्यः निष्क्रमणाय महर्षयः पञ्चमहायज्ञान् अकल्पयन् ।

**''भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति''**
(शतपथब्राह्मणम् 11/5/5/1)

ब्रह्मयज्ञः – वेदानां पठनं पाठनञ्च ब्रह्मयज्ञ इतिकथ्यते । वेदेषु उपासनाकाण्डं कर्मकाण्डं ज्ञानकाण्डमिति त्रिषु काण्डेषु ज्ञानस्यैव प्राधान्यम् । ज्ञानस्य कारणेन जीवान्तरस्यापेक्षया मानवयोनिश्श्रेष्ठा मता ।

देवयज्ञः – आत्मन इष्टदेवानामुपासानायै ब्रह्मणः परमात्मनो निमित्तेनाम्ना कृतं हवनं ''देवयज्ञः'' इत्यभिधीयते ।

यत्करोषि यदश्नासि, यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय, तत्कुरूष्मदर्पणम् ।। (गीता 9/27)

भगवतः श्रीकृष्णस्य वचसा सिध्यते यत् परब्रह्मपरमात्मा एव समस्तयज्ञानामाश्रयभूतोऽस्ति।अतः ब्रह्म यज्ञे ऋषि गणाः पितृ यज्ञे अर्यमादि नित्य पितृगणाः तथा परलोकगामिनः नैमित्तिक पितृगणाः भूतयज्ञे देवरूपाः अनेकान् प्राणिनः ज्ञात्वा ''यद्यद्विभूतिमत्सत्त्वम्'' (गीता 10/41) अनेन गीतोक्तभगवद्वचनानुसारेण ईश्वरविभूति धारिणां देवानां यद्यत् पूजा क्रियते तत् सर्वव्यापकाय अन्तर्यामिने परमात्मने गच्छति ।

नित्यनैमित्तिकोभयभेदेन देवाः द्विधा विभक्ताः। तेषु रूद्रगणाः, वसुगणाः, इन्द्रादिदेवाः नित्यं कथिताः । तथा च ग्रामदेवता, वनदेवता, गृहदेवतादयो नैमित्तकदेवाः कथ्यन्ते । उभौ देवते तृप्तिमस्मिन् यज्ञे गच्छतः ।

भूतयज्ञः – कृमि–पतङ्ग–पशु–पक्षिणां सेवाभूत यज्ञेनाभिधीयते। ईश्वरीयसृष्टेः कस्यचिदप्यङ्गविशेषस्योपेक्षां कर्तुं नैव शक्यते। यतो हि सृष्टेः केवलमेकस्याङ्गस्य सहाय्येन समस्ताङ्गनां सहायता अवबोध्यते। अतो भूतयज्ञः परमो धर्मः । प्रत्येकस्य मनुष्यस्य श्वास प्रश्वास ग्रहणे, भोजन प्राशन विहार सञ्चारादिषु कर्मसु अगणित–जीवनां हिंसा भवत्येव । निरामिषभोक्तृणां भोजनकालेऽप्यगणित जीवानां प्राणवियोगो जायते किं पुनः सामिषभोजिनां कृते। अतः जीवेभ्यः ऋणविमुक्तये भूतयज्ञः आवश्यकः यतो हि एतेनानेककीटानां पशुपक्षिणां तृप्तिर्जायते ।

पितृयज्ञः–अर्यमादिनित्यपितृणां तथा परलोगामिनां नैमित्तिकपितृणां पिण्डप्रदानादिसेवया यद् यज्ञः क्रियते स पितृयज्ञः कथ्यते। सन्मार्गप्रवर्तक – पित्रोः कृपयासन्मार्गं परित्यज्य मानवः ज्ञानं लभते। अनन्तरं धमार्थकाममोक्षानधिगम्य मुक्तो भवति। इत्थं दयालुमाता–पित्रोः तृप्तहेतवे तयोः सम्मानाय तौ प्रति कृतज्ञतां प्रदर्शयन् तयोः ऋणविमुक्तये पितृयज्ञ आवश्यकः यतो हि पितृयज्ञेन समस्तलोाकनां तृप्तिः तथा पितृणां तुष्टेः अभिवृद्धि जायते।

मनुष्ययज्ञः – क्षुधाव्याकुलमानसस्य मानवस्य गृहे अतिथावागते सति भोजनपानादिव्यवस्थया कृता सेवा मनुष्ययज्ञःकथ्यते। अतिथौ गृहे प्राप्ते सति सः कस्याश्चिज्जातेः सम्प्रदायस्य स्यात् तं पूज्यं मत्वा पथ्यपाद्यार्घ्यादिद्वारा समुचितपूजां कृत्वा अन्नादेर्व्यवस्था कल्पनीया ।

अस्य विषयस्य पुष्टिः भगवान् मनुर्मनुस्मृतौ तृतीयेऽध्याये (3189–102) 107–111 तमे विशदेन अकरोत्। एतेन सिध्यते यत् पृथिव्याः समस्त सामाजिकानामथिति रूपेण धर्मस्य परिपालनमावश्यकम् ।

प्रथमावस्थायां मनुष्यः स्वशरीरमात्रस्य सुखेनात्मानं सुखी अवगच्छति पुनश्च स्वपुत्रकलत्रमित्राणां सुखं दृष्ट्वा सुखी भवति। अनन्तरं स्वदेशवासिनां सुखं निरीक्ष्य सुखी भवति । ततो ज्ञानं प्राप्य समस्तलोकानां सुखं दृष्ट्वा प्रसीदति । किन्तु वर्तमानसमये एकः मनुष्यः सर्वप्राणिनां सेवां कर्तुं न शक्यते । अतः यथाशक्तिरन्नादिदानद्वारा मानवमात्रस्य सेवा एव मनुष्ययज्ञः इत्यभिधीयते । मनुष्ययज्ञेन धनायुर्यशःस्वर्गादेः प्राप्तिर्भवति।

कालिकापुराणे (31/40) तमे श्लोके लिखितं यत् ''सर्व यज्ञमयं जगत्'' अर्थात् समस्तं जगत् यज्ञमयं वर्तते। सन्ध्या, तर्पणम्, बलिवैश्वदेवः, देवपूजा, अतिथिसत्कारः, व्रतः जपः, कथाश्रवणम्, तीर्थयात्रा, अध्ययनाध्यापनम्, अशनम्, जागरणम्, इत्यादि कार्याणि नित्यानि तथा उपनयनविवाहसंस्कारादयः नैमित्तकाः एवं पुत्रेष्टिराज्यप्राप्तिकाम्यकर्माण्यादीनि यज्ञस्वरूपाण्येव कथितानि । न केवलमेतदपितु जीवनं मरणमपि यज्ञस्वरूपं कथितम् । गीतायाः (4/48) तमे श्लोकेभगवता श्रीकृष्णेनापि द्रव्ययज्ञ– तपोयज्ञ– योगयज्ञ– स्वाध्याय– यज्ञादीनामुल्लेखं विधाय यज्ञ स्वरूपमेव प्रदत्तम् तथा च गीता (2/31) तमे श्लोके श्रीकृष्णेन गर्भाधानं तथा युद्धमपि यज्ञरू मिति वर्णयामास । तेन कथितं यत् मनुष्यस्य धर्मसम्मतानि सर्वाणि कार्याणि यज्ञरूपाणि सन्ति यथा –

**यज्ञार्थात्कर्मणाऽन्यत्र लोकोऽयं कर्मबन्धनः ।। (गीता 3/9)**

अर्थात् मनुष्यस्य सर्वाणि कर्माणि यज्ञार्थानि स्युः एवं विधिना मानवस्य धर्मसमन्वितसर्वकमाणि यज्ञो भवितुमर्हन्ति । किन्तु तानि स्वेच्छाचाराधरितानि न अपितु वेदविहितसद्ग्रन्थाधारितानि भवेयुः ।

शास्त्रानुकूलानि यज्ञकर्माणि एव फलप्रदानि तथा महत्वप्रदानि भवितुमर्हन्ति । हिन्दुधर्मे गृहस्थजीवनमपि यज्ञस्य स्वरूपं कथितम् । अस्मिन् यज्ञे विवाहिता धर्मपत्नी जीवनपर्यन्तं पत्युः सहायतां, सेवामाज्ञां च पालयति ।

महाकविकालिदासः गृहस्थाश्रमे परिनिष्ठितादर्शस्य पतिपत्न्योः सुन्दरं चित्रणं चक्रेयथा–

**विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।**
**अन्वासितमरून्धत्या स्वाहैव हविर्भुजम् ।। (रघु. 1/15)**

गृहस्थधर्मस्य महान्, आदर्शचार्यः, भगवान्, रामः स्वपितुराज्ञया चतुर्दशवर्षस्य वनवासं स्वीचकार । तद् वनवास–रूपयज्ञस्य पूर्णतायै एव सीतायाः वनवासः रामस्य सेवार्थं तदप्येको यज्ञः एव।

एवं प्रकारेण भगवता शङ्करेण द्वारा मातुः पार्वत्याः श्रीरामस्य कथा श्रवणम्, तथा श्रीकृष्णेन धर्मसंस्थापनार्थमवतारं धृत्वा गवां, सतां दीनानां दुःखोद्धारं विधाय यज्ञमेवाकरोत् । माता–पित्रोः, आचार्याणां गुरूजनानां सेवाऽपि यज्ञमेवाऽस्ति । भगवतः श्रीरामस्य सम्पूर्णं जीवनं यज्ञमासीत्, तेनैव कारणेन अद्य संसारः श्रीराममादर्शं मत्वा पूजयन्ति । एवमेव श्रीकृष्णस्यापि जीवनं यज्ञमयमासीत् येन कारणेन वयं यज्ञपुरुषरूपेण तस्य पूजनं कुर्मः ।

''यज्ञो वै विष्णुः'' शतपथ. (1/1/2/13)

एतेन स्पष्टं यत् यथाश्रीरामः श्रीकृष्णः स्वस्य सम्पूर्णं जीवनं यज्ञमयं विधाय समापितवन्तौ तथैव अस्माभिरपि स्वजीवनं यज्ञमयं करणीयम् ।

छान्दोग्योपनिषद् (5/7/8) अनुसारेण हे गौतम । पुरुषः एव अग्निः, तस्य वाणी एव समिधा, प्राणाः धूम्राः,जिह्वा एव ज्वाला,चक्षुषी अङ्गारे, कर्णौ अग्निशिखा, तस्मिन् अग्नौ देवगणाः अन्नानि जुहवति। तथा आहुत्या वीर्यमुत्पद्यते।

वयं प्रतिदिनं भोजनं कुर्मः भोजनसमये यदि वयं प्रारम्भे पञ्चग्रासान् शास्त्रीयविधिना भोजनं कुर्याम तदा अस्मदीयं भोजनम् ''अग्निहोत्रयज्ञः'' भवति। येन असमभ्यं सन्ततिपशुतेजसामन्नादीनां ब्रह्मतेजसां लब्धिर्भवति। अस्माकं समस्ताः पापाः तापा नश्यन्ति

छान्दोग्योपनिषद् (5/18/24) श्रौतयज्ञे प्रातः सवनम्,

माध्यान्दिनसवनम्, तृतीयसवनम्। एतानि त्रीणि सवनानि भवन्ति। एषु प्रातः सवनस्य सम्बन्धः चतुर्विंशत्यक्षरात्मकाद् गायत्रीछन्दसः तथा वसुगणेभ्यो वर्तते ।

माध्यन्दिनसवनस्य समबन्धाश्चतुश्चत्वारिंशदक्षरात्मकस्त्रिष्टुपछन्दसः रूद्रदेवेभ्यः अस्ति। तृतीयसवनस्य सम्बन्धोऽष्टचत्वारिंशदक्षरात्मकाज्जगतीछन्दसः तथा आदित्य देवेभ्योऽस्ति ।एतेषां सवनत्रयाणां देवताः शास्त्रोक्तविधिना यज्ञमयं जीवनं जीवतः पुरूषस्य कष्टानि दूरीकृत्य तं नीरोगं स्थापयन्ति ।येन मानवः सम्पूर्णायुः पर्यन्तं जीवति ।

अस्मांक धर्माचार्यैः मनुष्याणां कृते यावतः धर्मानकथयन् ते सर्वे यज्ञलक्षणेन संयुक्तायज्ञमयाः सन्ति। प्राचीनकाले ऋषयो मुनयः शास्त्रानुसारेणैव स्वजीवनं यज्ञमयम् अकुर्वन्। ते यज्ञैरेव आत्मनस्तथा जगतः कल्याणं कुर्वन्तिस्म वस्तुतस्तु यज्ञे अलौकिकशक्तयो विद्यन्ते। यतो हि यज्ञेन यो यद् वस्तु कामयते तद्वस्तुनः प्राप्तिर्भवत्येव –

**यो यदिच्छति तस्य तत्।। कठोप. (1/2/16)**

ऋग्वेदे 8/86/3 तमे छन्दसि कथितं यत् यो मनुष्यो यज्ञं न मन्यते, यो यज्ञे देवतानिमित्तमन्नं हविश्च स्वाहा, स्वधा, वषडरूपेण न समर्पयति सः पारलौकिकेभ्यः सुखेभ्यः व िचतो भवति ।तथा तस्मै काकगृध्रशुनांयोनिर्लभ्यते, यः पुण्यात्मा यज्ञं प्रति श्रद्धाविश्वासौ करोति तथा यज्ञं विधीयते स यज्ञपुण्येन देवो भवति ।

ऋग्वेदे(5/35/8) तत्र वर्णितं यत् प्राचीनकाले सुधन्वनः त्रयः पुत्राः यज्ञद्वारा मनुष्ययोनेर्देवाः योनित्वं गताः । ऋग्वेद (90/66/2) तत्र वर्णितं यद् मरूद्गणाः पूर्वं मानवाः आसन् किन्तु यज्ञं कृत्वा देवत्वं प्राप्ताः ।

शुक्लयजुर्वेदे(31/9) तमे छन्दसि समागतं यद् सर्वप्रथमं भगवतः यज्ञपुष्रूषाद् इन्द्रादयो देवाः, सृष्टिसाधनयोग्यप्रजापतयः साध्याः मन्त्रद्रष्टारः ऋषयः भगवतो यज्ञस्य यजनं कृतवन्तः ।

**तं यज्ञं बर्हिर्षि प्रौक्षन् पुरूषं जातमग्रतः।**
**तेन देवा अजयन्त साध्याः ऋषयश्चये।।**

शतपथब्राह्मणे 11/1/8/3 तमे छन्दसि लिखितं यत् प्रजापतिः स्वस्य प्रतिमारूपे सर्वप्रथमं यज्ञमुत्पादयत् ।अतः यज्ञः साक्षात् भगवान् ।

अथैनमात्मनः प्रतिमामसृजत यद् यज्ञम् तस्मादाहुर्यज्ञपतिर्यज्ञमित्यात्मनो ह्येनं प्रतिमामसृजत।

**यज्ञेन यज्ञमयजन्त देवाः।** शु.य. (31/16)
**यज्ञेन वै तद् देवा यज्ञमयजन्त।** (ऐतरेय. 1/16)
**पुरूषो वै यज्ञः। शतपथ.** (1/3/2/1)

यद्यज्ञः सर्वेषां भुवनानां केन्द्रोऽस्ति यद्यज्ञः सम्पूर्णां वसुधां दधाति । यद्यज्ञः साक्षादीश्वरस्य स्वरूपं वर्तते, तद्यज्ञस्य महत्वं चतुर्वेदेषु विस्तृतेन वरीवर्ति । वेदेषु यज्ञस्य महनीयं महत्वं प्रदत्तमस्ति ।शुक्लयजुर्वेदस्यैकत्रिंशत्तमेऽध्याये मन्त्रेषु परमेश्वरः एव यज्ञेन समस्तसृष्टिम्, वेदान्, चन्द्रमसम्, सूर्यम्, वायुम्, पचप्राणान्, अन्तरिक्षम्, द्युलोकम् पृथिवीलोकम्, तथा दशदिशाः उत्पाद्य सर्वान् दधाति ।ऐतरेयब्राह्मणे (5/5/8) कथितं यत् भगवता यज्ञपुरूषेणैव यज्ञकार्यसम्पादनाय वेदानसृजत् ।

**यज्ञं वष्टु धिया वसुः** (शु.य. 20/84)
**अर्थात् यज्ञेनैश्वर्यप्राप्ति र्जायते।**
**यज्ञो भुवनस्य नाभिः** (शु.य. 23/62)

यज्ञः एव समस्तं ब्रह्माण्डं बध्नाति तस्य नाभिस्थानं वर्तते ।

यत्कामास्ते जुहुमस्तन्नोऽस्तु । (शु.य. 10/20)

यो यां कामनां स्वीकृत्य यज्ञं विदधाति, तस्यतत् कामनां यज्ञः पिपर्ति ।

**यैरीजानाः स्वर्ण यान्ति लोकम्** ।(अथर्ववेद 18/4/2)
**यज्ञाः प्रथिवीं धारयन्ति।** (अथववेदः)
**यज्ञाद् वै प्रजाः प्रजायन्ते।** (शतपथ. 1/9/2/5)
**यज्ञो वै देवानामात्मा।** (शतपथ. 9/3/2/7)

निष्कर्षतो वक्तुं शक्यते यत् वेदविहितकर्म एव यज्ञः ।यथा सूर्यः स्वकिरणान् प्रदाय जगते जीवनशक्तिं प्रयच्छति तथैव यज्ञः संसारस्य प्राणशक्तिः दैविक दैहिकभौतिकत्रिविधतापोपशमनाय यज्ञादृते नान्यः पन्थाः ।

अन्ते विद्वद्भिः यथा यज्ञेन, तपसा, श्रमेण स्वर्गं याताः –
''देवा वै यज्ञेन श्रमेण तपसाहुतिभिः स्वर्गं लोकमाययन''

तथैव भगवन्तं यज्ञपुरूषं प्रार्थये यत् अस्माकं पवित्रः भारतवर्षः पुनः यज्ञबाहुल्यात् ''यज्ञीयदेशः'' इति नाम्ना संसारे ख्यातिं प्राप्नुयात् ।अस्मिन् पवित्रे यज्ञीयदेशे सर्वे प्राणिनः सर्वदा, सर्वत्र, सर्वविधिना सर्वतो मुखेन सुखिनः, समृद्धाश्च स्युः ।

**सर्वेऽपि सुखिनः सन्तु, सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुखभाग्भवेत् ।।**

# श्रीजगन्नाथसुप्रभातम्

श्रीरौषसी श्रयति पूर्वदिशां निशान्ते, श्रीनाथ जागृहि जगत्त्रय मङ्गलाय।
श्रीनीलशैलनिलयाह्निकमाचरिष्यन्, श्रीपूरुषोत्तम तवाच्युत सुप्रभातम्॥1॥

उन्मीलितानि नलिनानि सरोवरेषु, पश्याद्य कैरववनानि निमीलितानि।
मुक्ताफलायिततुषारकणास्तृणाग्रे, श्रीमन्ननन्त पुरुषोत्तम सुप्रभातम्॥2॥

दोहावसान परिपायित बालवत्साः, प्राणायितास्तव विमोचितरज्जुबन्धाः।
गावश्चरन्ति तृणभूषु विलोलबालाः, गोविन्द नीलगिरिनायक सुप्रभातम्॥3॥

खे कीचुकीच्विति नवौषसि कूजनानि, कृत्वा त्यजन्ति तरुनीडगृहान्विहङ्गाः।
नामानि ते निजगिरेव समुच्चरन्तः, नीलाद्रिवास गरुडध्वज सुप्रभातम्॥4॥

नीलार्णवः प्रशममेति शनैरिदानीं, निष्क्रान्त धीवर कुलप्लव दृश्यमानः।
निर्विश्य पान्थनिवहैरवगाह्यमानः, नीलाचलालय हरे तव सुप्रभातम्॥5॥

त्वन्मन्दिरस्थबहुसद्मगतानि नित्यं, त्वद्वीक्षणैधितबलान्यपि दैवतानि।
तान्युत्थितानि तव वीक्षणकामुकानि, नीलाचलेश तव केशव सुप्रभातम्॥6॥

तारागणो वियति याति लयं क्रमेण, ताराधिपो विगमितद्युतिरद्य सद्यः।
पारावताः परितपन्ति तवालयाग्रात्, नारायणेश पुरुषोत्तम सुप्रभातम्॥7॥

चत्वारि ते सुविदितानि चतुर्युगेषु, धामानि तेषु पुरुषोत्तमधाम मुख्यम्।
काले कलेरुपगतस्स वयं च रक्ष्याः, नीलाद्रिनाथ तव माधव सुप्रभातम्॥8॥

सन्ध्याऽभिधानगृहिणी परिवारभुक्त्यै, संदह्य पूर्वगिरिगोमयपिण्डखण्डम्।
उद्दीपयत्युषसि भानुमदाख्यचुल्लां, उत्तिष्ठ नाथ जगतां तव सुप्रभातम्॥9॥

श्री वैष्णवास्तव सिसेविषया प्रविष्टाः, श्रीमन्दिरं नियमतो लसदूर्ध्वपुण्ड्राः।
श्रीरोहिणीप्रभृतितीर्थमुपास्य तीर्थाः, श्रीनीलपर्वतपते तव सुप्रभातम्॥10॥
आदित्यरुद्रवसवो मरुतस्सशक्राः, पूर्वाह्नकृत्यमवसाय्य भवत्समीपम्।
अभ्यागता भवदनुग्रहमासुकामाः, नीलाद्रिशेखर हरे तव सुप्रभातम्॥11॥

प्रष्टुं सुखं शयितवानसि वेत्यमी त्वां, देवर्षयस्सनकतुम्बुरुनारदाद्याः।
अत्रागताश्श्रुतिसुखां श्रुतिमीरयन्तः, नीलाद्रिनायक हरे तव सुप्रभातम्॥12॥

वीणामृदङ्गमुरलीपटहादिहस्ताः, गन्धर्वकिन्नरगणाः गरुडाश्च यक्षाः।
गायन्त्यमी मृदुपदं तव बोधनाय, श्रीनीलशैलवसते तव सुप्रभातम्॥13॥

प्रातः प्रभो पतितपावन पश्य सिंह-द्वारे प्रदर्शयितुमिच्छति विश्वरूपम्।
हम्बारवं विदधती कपिला सवत्सा, गोविन्द नीलगिरिगोचर सुप्रभातम्॥14॥

काको भ्रुषण्ड इति नाम पुरा य इन्द्र-द्युम्नस्तवालयमधादिति सत्यमूचे।
तद्वंशजाः इह रटन्ति समेत्य काकाः, विष्णो मुकुन्द पुरुषोत्तम सुप्रभातम्॥15॥

माया स्वयं तनुमती सविधे सुभद्रा, संकर्षणश्च भगवान् बलभद्र रूपः।
उत्थाय चाह्निकमुपासितुमागतौ तौ, नीलाद्रिनाथ मधुसूदन सुप्रभातम्॥16॥

वीथीषु नाथ विविधापणमण्डितासु, विद्योतितोरणविभिन्नमठाञ्चितासु।
सिञ्चन्ति वारि परिमृज्य शनैर्गृहिण्यः, नीलावनधरपते तव सुप्रभातम्॥17॥

पण्डाभिधद्विजगणस्समुपागतोऽयं, त्वत्पूजनार्चनविधौ विधिना नियुक्तः।
त्वद्दन्तधावनविधिं समये चिकीर्षन्, श्रीनीलभूधरपते तव सुप्रभातम्॥18॥

नानामताश्रयमठाः जगदीशपुर्यां, ये स्थापिता गुरुभिरत्र च तत्र पूर्वम्।
तेषामयन्ति पतयस्तव सेवनार्थं, नाथ त्रिविक्रम पुरीप्रिय सुप्रभातम्॥19॥

यो मार्ष्टि ते रजतकाञ्चनमार्जनीभी-राजा रथं स्वयमुपेत्य रथोत्सवेषु।
सोऽप्यागतस्तव सिसेविषयाऽद्य शौरे, नीलाचलावसथ वामन सुप्रभातम्॥20॥

आनन्द संज्ञविपणिं तव मन्दिरान्तः, विक्रीयमाणबहुभोगमहाप्रसादाम्।
उद्घाटयन्नुपगतो वणिजां समूहः, नीलाद्रिवास नरकान्तक सुप्रभातम्॥21॥

विश्वावसुप्रियसख प्रियबन्धवस्ते, ये बन्धकर्षणकृतो दयिताभिधानाः।
अभ्यागतास्तव निषेवणकांक्षया ते, नीलाद्रिकेतन जनार्दन सुप्रभातम्॥22॥

ये नर्तयन्ति भुवि भावुकरञ्जनाय, नृत्यप्रवीणरमणीस्त इमेऽभ्युपेताः।
गायन्ति हृद्यमधुरं जयदेवपद्यं, भोः श्रीधर श्रितपुरीवर सुप्रभातम्॥23॥

त्वद्दर्शनार्थमिह दूरत आगतानां, सेवार्थिनां दिनमुखे मुखरस्समूहः।
त्वन्मन्दिराभिमुखमेति कुतूहलेन, श्री नीलशैलशिखरालय सुप्रभातम्॥24॥

धूमानसस्त्वदभिधानधरस्त्वरावान्, यः कालिघट्टत उपैति पुरीं प्रभाते।
सोऽप्यागतस्तव परश्शतभक्तवाही, नीलाद्रिशेखर विभो तव सुप्रभातम्॥25॥

आचारवस्त्रपरिवेष्टनलक्ष्यमाणाः, आयान्ति यात्रिगणयन्त्रणतन्त्रदक्षाः।
एते भटास्तव सवेत्रकरा हृषीके-शोद्दण्ड भासुरसुदर्शन सुप्रभातम्॥26॥

त्वां प्रातराशयितुमम्बुजनेत्र भोगं, पाकालये परिजनः किल सूपकारः।
भाण्डेष्वयं पचति सम्प्रति मृण्मयेषु, श्री पद्मनाभ पुरुषोत्तम सुप्रभातम्॥27॥

द्वारं करेभ्य इह तावकसेवकानां, दानं जिघृक्षुरधितिष्ठति भिक्षुवर्गः।
दीनाबलाङ्गविकलातुररुग्णपूर्णः, नीलाचलेश नृहरे तव सुप्रभातम्॥२८॥

नीलाद्रिशृङ्गपुरुषोत्तम धाम्न एतत्, दामोदरस्य पठतामिह सुप्रभातम्।
सानन्दबोधजननी हरिपादभक्तिः, श्रेयस्करी भुवि भविष्यति तत्प्रसादात्॥29॥

**–श्री श्री सुन्दरराजः**
निवास–21, वी.आई.पी कालोनी, एकाम्र विहार,
नयापल्ली, भुवनेश्वर–751015।




## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# पालिव्याकरणे संस्कृतव्याकरणस्यावदानम्

**गजाननधरेन्द्रः**
**शोधच्छात्रः (व्याकरणविभागः)**
**राष्ट्रियसंस्कृतसंस्थानम्**
**(मानितविश्वविद्यालयः)**
**नवदेहली**
**चलवाणी सं.- 9711274112**
**ई.मेल- gdharendra@gmail.com**

भारतीयज्ञानपरम्परायां पालिभाज़ायाः महत्त्वपूर्णम् योगदानं वर्तते। पालिभाषायां यदा त्रिपिटकसंग्रहं अभवत्, कालान्तरे च तस्योपरि अट्ठकथानां रचना जाता तदा टीकानां अनुटीकानां प्रादुर्भावः जातः। अस्मिन् एव युगे पालिविदुषां ध्यानं काव्यव्याकरणछन्दशास्त्रालङ्कारशास्त्रादिषु आकृष्टम् अभवत्। कस्यामपि शास्त्रीयभाषायाम् अधिकारप्राप्त्यर्थम् तस्य व्याकरणशास्त्रस्य पूर्ण ज्ञानमावश्यकम् भवति। अत एवोक्तं यत् **"मुखं व्याकरणं स्मृतम्"** इति [1]। पालिभाषायां भगवता बुद्धेन ज्ञानं दत्तमिति सर्वे जानन्त्येव। पालिष्ठाब्दस्य प्रयोगः प्रायः बुद्धवचनेन सह सम्बद्धः। अद्य स्थिरवादी त्रिपिटकः यस्यां भाषायां प्राप्यते सा भाज़ा मागधीति नाम्ना व्यवह्रियते। संग्रहेऽस्मिन् बुद्धवचनैः सह पञ्चमष्ठाताब्दीपर्यन्तम् दार्शनिकविचाराणां सांस्कृतिकः, राजनैतिकः, भौगोलिकेतिहासष्ठचादीनां ज्ञानराशिः सन्निहिताऽस्ति।

यद्यपि मागधी अथवा पाली एका प्राचीनाभाषा अस्ति, परञ्च अस्याः व्याकरणग्रन्थः अपेक्षाकृतः अर्वाचीनः। पालिभाज़ायां पञ्चव्याकरणसम्प्रदायानामुल्लेखः प्राप्यते।

१.बोधिसत्तव्याकरणम् २. कच्चायन्व्याकरणम् ३. सब्बगुणाकरव्याकरणम् ४. मोग्गलायन (मोग्गलान) व्याकरणम्५. सद्दनीतिव्याकरणम्

एतेषु प्रथमः (बोधिसत्तव्याकरणम्) तृतीयः (सब्बगुणाकरणव्याकरणम्) इत्येतयोः प्राप्तिर्न भवति सम्प्रति। शेषत्रिषु व्याकरणेषु प्राचीनतायाः दृष्ट्या कच्चायनव्याकरणम् अत्यन्तम् महत्वपूर्णम् अस्ति। यतो हि अस्योपरि व्याख्याभूताः अनेके ग्रन्थाः लिखिताः। कच्चायन-न्यासः, सुत्तनिद्देसः, कच्चायनवण्णना, अंगुत्तरटीकादीनां अध्ययनेन ज्ञायते यत् एतेषु महाश्रावकेषु एकतमः महास्थविरः महाकच्चायनः अस्य ग्रन्थस्य रचयिता इति मन्यते। जेम्स एलविशः, मोरिशदयः पाश्चात्यविद्वान्सः एनं समर्थयन्ति परञ्च अनेके प्राच्याः पाश्चात्याः विद्वान्सः एतन्न स्वीकुर्वन्ति। तथापि उपलब्धान् व्याकरणत्रयीग्रन्थान् आधुनिकाः भाषाशास्त्रिणः ई. पञ्चमशताब्द्यां पाश्चात्त्यरचनेति अङ्गीकुर्वन्ति। जी.पी. मल्लशेखरः, लक्ष्मीनारायणतिवारिसदृशाः विद्वान्सः पालिव्याकरणस्य प्राचीनां परम्परां स्वीकुर्वन्तोऽपि वर्तमानस्य कच्चायनव्याकरणस्य रचना ई. सप्तमशताद्यां सिंहलदेशे (श्रीलंकायाम्) स्वीकुर्वन्तः प्रतीयन्ते। भाषाविदां मते मोग्गलानव्याकरणस्य रचना ई. द्वादशशताब्द्यां सिंहलदेशे (श्रीलंकायां) अभवत् तथा च "सद्दनीति" इत्यस्य रचना सन् **११५४** ई. वर्षे ब्रह्मदेशे (म्यांमारदेशे) अभवत्।

यद्यपि प्राकृतसंस्कृतयोर्प्राचीनतार्वाचीनतयोः प्रश्नः अद्यापि अनुत्तरितः, परञ्च पालिभाषा संस्कृतस्य निकटतमाप्राकृतभाषा अस्ति। विषयेऽस्मिन् विदुषां मतभेदो न दृश्यते। अनयोः व्याकरणयोः तुलनात्मकाध्ययनेन ज्ञायते यत् उपलब्धासु पालिव्याकरणपरम्परासु पाणिनीयचान्द्रकलाप-(कातन्त्रः) -आदीनां संस्कृतव्याकरणानां प्रभावः पूर्णत्वेन स्पष्टरूपेण च दृश्यते। मोग्गलान्व्याकरणग्रन्थ- भूमिकायां पूज्याः विद्वान्सः शान्तिभिक्षुशास्त्रिमहोदयाः ये पालिसंस्कृतयोः मर्मज्ञाः ते कथयन्ति यत् "सर्वे पालिव्याकरणाः संस्कृतव्याकरणानां कृतज्ञाः"[2] एवमेव अन्ये पालिवैयाकरणाः स्वरचनासु अपि स्वीकुर्वन्ति। पालिव्याकरणे संस्कृतव्याकरणस्यानेकाः संज्ञाः ग्रहीतास्सन्ति, यथा अककखरअघोसअपादानम्आगमउत्तमपुरिसउपसग्गकारककत्ताधातुनामपरिभासा, -पाटिपदिकव्यञ्जन-योगविभाग-लिङ्गबुद्धिविभासासब्बनामसमास-सम्पादनादयश्च।

संस्कृतव्याकरणस्य ऋणं स्वीकुर्वन् कच्चायनः **'परसमञ्ञा पयोगे'** सूत्ररचनां कृतवान्। यस्य वृत्तौ स्पष्टोद्घोषः यत् "संस्कृतग्रन्थेषु घोषः अघोषादयः याः संज्ञाः तासु प्रयुक्तेषु सत्सु अत्रापि ग्रहणम् इति" सूत्राणां विधिः व्याख्यानादिसु पालिव्याकरणे संस्कृतव्याकरणात् ऋणस्वरूपे अनेकत्वेन बहुलत्वम् ग्रहीतम् **"नामानं समासो युत्तत्थो" (३१८)** सूत्रस्य व्याख्यायाम् न्यासकारः महाभाष्ये समासवृत्तिसन्दर्भे आगतव्याख्यानस्यैव पालिरूपान्तरं कृतम्। एतादृशी स्थितिः "मोग्गलानपञ्चिकायाः अपि अस्ति। न्यासे आगतमस्ति यत्- **"किं तेसं ते युत्तत्थभावमुपगच्छन्ता पजहित्वावत्तनो अत्थे युत्तत्थभावमुपगछेय्युं....."** एवं हि लोके दिस्सति- **"कोचि भिक्खुं डुतीयं भिक्खं लभित्वा न पुब्बं जहाति"** आदयः। सूत्रमिदमपि कातन्त्रात् गृहीतमस्ति। कारकाणां व्याख्यानेऽपि न्यासः तथा कच्चायनवण्णनां अस्मिन्नपि संस्कृतव्याकरणस्य प्रभावः स्पष्टरूपेण दृश्यते। एवमेव एतादृशानां सर्वसूत्राणां तथा च अन्यसमाग्रीणां मूलग्रन्थस्य सम्पादने तत्तत्स्थलेषु पाणिनिना कातन्त्रेण च तुलनां कुर्वन्तः पादटिप्पणिभिः तान् अङ्गी करोतीति।

एतदतिरिक्तं (कच्चायनसम्प्रदायभिन्नम्) मोग्गलान् सद्दनीतिव्याकरणेषु अपि संस्कृतव्याकरणस्य प्रभावः सुस्पष्टः अस्ति। मोग्गलानव्याकरणेऽपि पाणिनिः कातन्त्रचन्द्रगोमिनां व्याकरणेभ्यः प्रभूतां साम्ग्रयां ग्रहीतमस्ति। सद्दनीत्यां तु शैली, भाषा, विवेचनप्रक्रियासु सर्वासु संस्कृतस्य प्रभावः दृष्टिगोचरः भवति। पालिव्याकरणस्य विभागाः अपि संस्कृतव्याकरणस्य प्रभावेन पूर्णतया प्रभाविताः सन्ति। एवमेव धातुपाठानामपि स्थितिः अस्ति। पालिभाषायाः व्याकरणे (कच्चाव्याकरणे) **६७५** सूत्राणि सन्ति। मोग्गलानव्याकरणे = **८१७** सूत्राणि सन्ति। तथा च सद्दनीति व्याकरणे = **१३९१** सूत्राणि सन्ति।

"एतेषु कच्चायनव्याकरणे यानि सूत्राणि **६७५** सन्ति तेषु **३६०** सूत्राणि संस्कृव्याकरणेन सह तेषां साम्यत्वं दृश्यते"[3]। एवमेव कच्चायनमोग्गलायनयोः वैयाकरणाः कातन्त्रादिसंस्कृतव्याकरणानां सूत्राणि स्वरचनायाः आधारः मन्यन्ते। अनेन पालिव्याकरणं सुंस्कृतम्, पुष्टः प्रौढष्टचाभवत्। अत्र अष्टाध्यायी- चान्द्र-कच्चायन-मोग्गालनव्याकरणस्य सूत्राणाम्, संज्ञानाम् कार्यानाम्, विधीनाम्, प्रत्ययादीनाञ्च साम्यत्वम् तालिकामाध्यमेन प्रस्तुतम्-

| क्र.सं. | व्याकरणम् | सूत्रम् | सन्दर्भः | कार्यम् | समीक्षा |
|---|---|---|---|---|---|
| १. | कातन्त्रम् | क्रियाभावो धातुः | ३/१/९ | धातुसंज्ञा | साम्यत्वम् |
| | पाणिनीयः | भूवादयो धातवः | १/३/१ | धातुसंज्ञा | |
| | कच्चायनः | भूवादयो धातवो | ३/२/२६ | धातुसंज्ञा | |
| २. | कातन्त्रम् | नाम्नां समासो युक्तार्थः | २/५/१ | समाससंज्ञा | साम्यत्वम् |
| | कच्चायनः | नामानं समासो युत्तत्थो | २/७/१ | समाससंज्ञा | |
| ३. | पाणिनीयः | संख्यापूर्वो द्विगुः | २/१/५२ | द्विगुसंज्ञा | साम्यत्वम् |
| | कातन्त्रम् | संख्यपूर्वोद्विगुरिति ज्ञेयः | २/५/६ | द्विगुसंज्ञा | |
| | कच्चायनः | सङ्ख्यापुब्बो दिगु | २/७/१० | द्विगुसंज्ञा | |
| ४. | कातन्त्रम् | यत् क्रियते तत् कर्म | २/४/१३ | कर्मसंज्ञा | साम्यत्वम् |
| | कच्चायनः | यं करोति तं कम्मं | २/६/१० | कर्मसंज्ञा | |
| ५. | कातन्त्रम् | यः करोति स कर्ता | २/४/१४ | कर्तासंज्ञा | साम्यत्वम् |
| | कच्चायनः | यो करोति स कत्ता | २/६/११ | कर्तासंज्ञा | |
| ६. | कातन्त्रम् | येन क्रियते तत् करणम् | २/४/१२ | करणसंज्ञा | साम्यत्वम् |
| | कच्चायनः | येन वा कयिरते तं करणं | २/६/९ | करणसंज्ञा | |
| ७. | पाणिनीयः | आधारोऽधिकरणम् | १/४/४५ | अधिकरणसंज्ञा | साम्यत्वम् |
| | कातन्त्रम् | य आधारस्तदधिकरणम् | २/४/११ | अधिकरणसंज्ञा | |
| | कच्चायनः | योधारो तमोकासं | २/६/८ | ओकाससंज्ञा | साम्यत्वम् |
| ८. | कातन्त्रम् | तेज़ां द्वौ द्वावन्योऽन्यस्य सवर्णौ | १/१/४ | सवर्णसंज्ञा | साम्यत्वम् |
| | मोग्गलानः | द्वे द्वे सवण्णा | १/३ | सवर्णसंज्ञा | |
| ९. | कातन्त्रम् | पूर्वो ह्रस्वरू | १/१/५ | ह्रस्वसंज्ञा | साम्यत्वम् |
| | मोग्गलानः | पुब्बो रस्सो | १/४ | ह्रस्वसंज्ञा | |
| १०. | कातन्त्रम् | परो दीर्घरू | १/१/६ | दीर्घसंज्ञा | साम्यत्वम् |
| | मोग्गलानः | परो दीघो | १/५ | दीर्घसंज्ञा | |
| ११. | कातन्त्रम् | कादीनि व्यञ्जनानि | १/१/९ | व्यंजनसंज्ञा | साम्यत्वम् |
| | मोग्गलानः | कादयो व्यञ्जना | १/६ | व्यंजनसंज्ञा | |
| १२. | कातन्त्रम् | ते वर्गागाः पञ्च पञ्च पञ्च | १/१/१० | वर्गसंज्ञा | साम्यत्वम् |
| | मोग्गलानः | पञ्च पञ्चका वग्गा | १/७ | वर्गसंज्ञा | |
| १३. | पाणिनीयः | कर्मणि द्वितीया | २/३/२ | द्वितीयाविभक्तिः | साम्यत्वम् |
| | कच्चायनः | कमत्थे दुतिया | २/२/२७ | द्वितीयाविभक्तिः | |
| | मोग्गलानः | कम्मे दुतिया | २/२ | द्वितीयाविभक्तिः | |
| १४. | पाणिनीयः | कालाध्वनोरत्यन्तसंयोगे | २/३/५ | द्वितीयाविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | कालद्धानमच्चन्तसंयोगे | २/३ | द्वितीयाविभक्तिः | |
| १५. | पाणिनीयः | हीने | १/४/८६ | द्वितीयाविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | हीने | २/१४ | द्वितीयाविभक्तिः | |
| १६. | पाणिनीयः | कर्तृकरणयोस्तृतीया | २/३/१८ | तृतीयाविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | कत्तुकरणेसु ततिया | २/१८ | तृतीयाविभक्तिः | |
| १७. | पाणिनीयः | हेतौ | २/३/२३ | तृतीयाविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | हेतुम्हि | २/२१ | तृतीयाविभक्तिः | |
| १८. | पाणिनीयः | सहयुक्तेऽप्रधाने | २/३/१९ | तृतीयाविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | सहत्थेन | २/१९ | तृतीयाविभक्तिः | |
| १९. | पाणिनीयः | चतुर्थी सम्प्रदाने | २/३/१३ | चतुर्थीविभक्तिः | साम्यत्वम् |
| | कच्चायनः | सम्पदाने चतुत्थी | २/६/२३ | चतुर्थीविभक्तिः | |
| | मोग्गलानः | चतुत्थी सम्पदाने | २/२६ | चतुर्थीविभक्तिः | |
| २०. | पाणिनीयः | षष्ठी हेतुप्रयोगे | २/३/२६ | षष्ठीविभक्तिः | साम्यत्वम् |
| | मोग्गलानः | छट्ठी हेत्वत्थेहि | २/२४ | षष्ठीविभक्तिः | |
| २१. | पाणिनीयः | क्विप् च | ३/२/७६ | क्विप्प्रत्ययः | साम्यत्वम् |
| | कातन्त्रम् | क्विप् च | ४/३/६८ | क्विप्प्रत्ययः | |
| | कच्चायनः | क्वि च | ४/१/६७ | क्विप्रत्ययः | |
| २२. | पाणिनीयः | तव्यत्तव्यानीयरः | ३/१/९६ | तव्य, अनीयरप्रत्ययः | साम्यत्वम् |
| | कातन्त्रम् | तव्यानीयौ | ४/२/९ | तव्य, अनीयरप्रत्ययः | |
| | कच्चायनः | भावकम्मेसु तव्यानीया | ४/१/१७ | तव्य, अनीयरप्रत्ययः | |
| २३. | पाणिनीयः | तुभ्यमह्यौ ङयि | ७/२/९५ | तुभ्यं मह्यं ओदशः | साम्यत्वम् |
| | कातन्त्रम् | तुभ्यं मह्यं ङयि | २/३/१२ | तुभ्यं मह्यं ओदशः | |
| | कच्चायनः | तुम्हं मय्हं च | २/२/२३ | तुभ्यं मह्यं ओदशः | |

एतानि उदाहरणानि दृष्ट्वा ज्ञायते यत् पालिसंस्कृतव्याकरणपरम्परायां संस्कृतव्याकरणानां प्रभावः तथा संस्कृतव्याकरणस्यावदानम् अतीवमहत्त्वपूर्णं वर्तते। मूलत्वेन संस्कृतव्याकरणपरम्परयैव एतस्याः भाषायाः अर्थात् पालिभाषायाः व्याकरणपरम्परा सम्पोषिता अस्ति। भारतीयसंस्कृतौ साहित्ये च पालिभाषायाः महत्त्वपूर्णं योगदानं वर्तते यतोहि मूलत्वेन संस्कृतव्याकरणसाहित्यादिभिः सुसंस्कृता, पुष्टा, प्रौढा च भाज़ेयं तस्य संरक्षणमेव कृत्वा पालिभाषाविदां माध्यमेन पालिभाज़ासाहित्येन च भारतीयज्ञानपरम्पराम् आधारप्रदानं कृतम्, करोति, करिष्यति च। इति।

सन्दर्भग्रन्थाः

१. पालिमोग्गलानव्याकरणम्
२. कातन्त्रव्याकरणम्
३. कच्चायनव्याकरणम्
४. लक्ष्मीनारायणस्य कच्चायनव्याकरणम्
५. लघुसिद्धान्तकौमुदी
६. अष्टाध्यायी
७. सिद्धान्तकौमुदी
८. कातन्त्र तथा कच्चायन व्याकरण का समीक्षात्मक अध्ययन 'जानकी प्रसाद द्विवेदी
९. संस्कृतव्याकरण का इतिहास- युधिष्ठिर मीमांसक

**(Footnotes)**

1 महाभाष्ये 2 मोग्गलानव्याकरणस्य भूमिकायाम्- पृ.सं. 11

3 मोग्गलानव्याकरणस्य भूमिकायाम्- पृ.सं. 14

# गुरुकुलकुरुक्षेत्रे श्रद्धापूर्वकं शिक्षकदिवसस्य आयोजनम्

गुरूकुल कुरुक्षेत्रे शिक्षकदिवस समारोहः श्रद्धापूर्वक सुसम्पन्नो जातः। येषु गुरूकुलप्रधान कुलवन्तसिंह मैनी मुख्यातिथि रूपे उपस्थिताः आसन्। अस्मिन्नवसरे गुरूकुलस्य निदेशक व प्राचार्य कर्नल अरूणदत्ता एवं सहप्राचार्य शमशेरसिंह सहित समस्त अध्यापक एवं संरक्षकगण



उपस्थिताः आसन्। श्री सिंहः उक्तवान यत् समारोहस्य शुभारम्भः प्रार्थनाद्वारा अभवत् येषु मुख्यमासीत् यत् सम्पूर्ण समारोहे संचालनं छात्र एव कृतवान। छात्र अनेक विधिवा स्व गुरूं सम्मानं कृतवन्तः। एका लघुनाटिका माध्यमेन छात्रः प्रदर्शितवान यत् बिना गुरू कोऽपि अस्मिन प्रपञ्च सफलो नास्ति। लक्ष्यप्राप्तुं तेषां मार्गदर्शनं आवश्यकमस्ति।

श्रीदत्ता स्वसम्बोधने उक्तवान यत् भूतपूर्वराष्ट्रपति एवं महानशिक्षाविद् डॉ. सर्वपल्लीराधाकृष्णनस्य जन्मदिवसोपलक्ष्ये प्रत्येक वर्षस्य अक्टुबर मासस्य पञ्च दिनाङ्के भवति। ते उक्तवन्तः गुरू सः भवति यः स्वयं दीपवत् अन्येषां कृते प्रकाशं ददाति। स्वशिष्यं अन्धकारतः प्रकाशरूपी ज्ञानस्य मार्गे यो आनयति स एव गुरू भवति। अन्ते श्रीदत्ता समारोहे समागत कुलवन्त सैनि महोदस्य आभारं व्यक्तवन्तः। एवं अन्ते राष्ट्रगान द्वारा कार्यक्रमस्य समापनमभवत्।

**प्रथमपुटस्य शेषभागः**

## श्लोकरचना-प्रशिक्षण-कार्यशालायाः....

जयकान्तसिंहशर्मा व्याकरणस्य नियमाणां सामान्य ज्ञानं दत्वा तद्धित प्रत्ययस्य प्रयोगे बलं दत्तवान। डॉ.के.भरतभूषणः शिक्षणं रोचक निर्यातुं उक्तवान। डॉ. श्रीकृष्णसेमवालः काव्यपरम्परां अग्रे सारयित्वा संस्कृत भाषायाः संरक्षणस्य दिशि कार्य कर्तुं उक्तवान। डॉ.के.के.मिश्रा काव्य रचनायाः आभ्यास कर्तुं उक्तवान। डॉ.रमाकान्त गोस्वामि अखिल भारतीय संस्कृत सम्मेलनस्य




पक्षतः अपि एतादृशं कार्यशालायाः आयोजनाय प्रस्तावं दत्तवान। इयं द्वि दिवसीयकार्यशाला श्री.ला.ब.शा.विद्यापीठ एवं संस्कृतशिक्षकसंघ दिल्ली तत्वावधाने आयोजितम्। डॉ.ब्रजेश गौतम सर्वान् अतिथिनां स्वागतं कृतवान। कार्यक्रमस्य संचालनं डॉ.वी.दयालु कृतवान। प्रो. कमलाभारद्वाजः अतिथिनां आभारं ज्ञापितवती। एषु श्रीसंदीप उपाध्याय, डॉ.सुभाष कौशिक, डॉ. सत्यपाल, डॉ.गजाननधरेन्द्र, डॉ.नरेशबैरवा, डॉ. आभाझा, डॉ.लीनासिन्हा उपस्थिताः आसन्। धन्यवादः डॉ.वीदयालु महासचिव संस्कृतशिक्षकसंघ दिल्ली कृतवान।

# अयोध्यायां भगवतो रामस्य 151 मी वृहदाकारप्रतिमा स्थापिता भविष्यति



लखनऊ। अयोध्यायां यत्र राममन्दिर विषये उच्चत्तम न्यायालयस्य आदेशस्य प्रतिक्षा भवति। तत्रैव अयोध्या नगरीं भगवान श्रीरामस्य भव्य 151 मी. वृहदाकारस्य मूर्तेः उपहारे प्रदत्तम्। अस्याः स्थापना मुख्यमंत्री आदित्यनाथयोगी दीपावल्याः शुभावसरे करिष्यन्ति। अयोध्यायाः उभयोः सेतु मध्ये अस्याः स्थापना भविष्यति। अस्मिन् विषये अन्तिम निर्णयः स्थानीय प्रशासन एवं पर्यटन विभागः करिष्यतः। इयं मूर्ति ताम्र धातु निर्मितं भविष्यति। उ.प्र.राजकीयनिर्माणनिगम माध्यमेन अस्याः निर्माणं भविष्यति। नोएडा स्थित जयकाकितर मुख्य वास्तुविद् भविष्यति। इयं भव्यमूर्ति पर्यटकस्य आर्षककेन्द्रं भविष्यति। अस्याः पर्श्वेव, संग्राहलयः, कलाकेन्द्रम् एवं सभाङ्गणस्य निर्माणं भविष्यति। अत्र श्रीरामस्य जीवनवृत्तिम् एवं रामलिलायाः मञ्चनम् इत्यादि भविष्यति। मूर्तेः निर्माणं सर्वकारी धनेन न भविष्यति। अपितु समान्यजन एवं औद्योगिकक्षेत्र सम्बन्धिनः सहयोगं करिष्यन्ति।







**06-09-2018 दिनांके उत्तराखण्डराज्यस्य 95 विकासखण्डेषु उत्तराखण्ड-संस्कृत-अकादमी-द्वारा आयोजितानां खण्डस्तरीय-संस्कृतच्छात्रप्रतियोगितानां शुभारम्भः सञ्जातः। तत्र कनिष्ठ- वरिष्ठवर्गयोः संस्कृतनाटकम्, समूहगानम्, समूहनृत्यम्, वादविवादः, आशुभाषणम् श्लोकोच्चारणं च षडविधाः संस्कृतच्छात्रप्रतियोगिताः आयोज्यन्ते।**

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।